DPN 6637

Title : शिवार्चन चन्द्रिका / ŚIVĀRCANACANDRIKĀ

Run. No. 7363 Cat. No. Micro. No.

Subject Dharmaśāstra

Religion : Hindu / Bauddha

Language : Skt. / New. / Nep. / Skt.- New. / Maith.- New. / New.- Nep. /

Size in cms. 33 × 16 Folios 97 Lines (in a page) 12

missing 33,37

Compl. / Incompl. Chapt. / act /

Author / translator श्रीनिवास भट्ट (सुन्दराचार्यस्य शिष्य) Scribe / donor

Date: NS / SS / VS / KS Ruler / place

Script : New. / Dev. / Bhuj. / Ran. / Illus. :

Material : palmleaf / paper / thyasaphu / one side yellow

Condition : fine / damaged by worms, rats, water /

Beginning, colophon, post-colophon :

सुंदराचार्यशिष्येण श्रीनिवासेन चमता (।)
चंद्रिकायां प्रणेतायां मेकविंशाप्रकाशकः (।।) इति श्रीसुंदराचार्यचरणारविंद —

→

इंद्वांतेवासिना श्रीनिवासभट्टेन विरचितायां श्री३ शिवार्चनचंद्रिकायां
एकविंशः प्रकाशः समाप्तं शुभम्.

श्रीगणेशायनमः
अथपुरश्चरणविधिः तत्रपुरश्चरणसंपन्नोमंत्रोहिफलदायकः किंहोमैःकिंजपैश्चैवकिंमंत्रन्यासविस्तरैः रहस्यानां हिमंत्राणांयदिनस्यात्पुरक्रिया पुरक्रियाहिमंत्राणांप्रधानंबीजमुच्यते वीर्यहीनोयथादेहीसर्वकर्मसुनक्षमः पुरश्चरणहीनोपिनथामंत्रःप्रकीर्त्तितः इतिवेशंपायनेनपुरश्चरणस्यावश्यकत्वाभिधानात् तस्यतुनिर्ऋतिर्विधिहीनांफलंहंतिनुकर्मणामितिविधिहीनानुष्ठानेनिंदाश्रवणात्तदनुष्ठानविधिर्दिचार्यतेलिख्यते तत्रपुरश्चरणशब्दनिरुक्तिर्वीयवीयसंहितायां साधनेमूलमंत्रस्यपुरश्चरणमुच्यते पुरश्चरणीयत्वाद्विनियोगाख्यकर्मणां पुरोविनियोगस्यचरणात्तथोदितमिति विनियोगलक्षणंतुतत्रमंत्रतंत्रप्रकाशे धर्मार्थकाममोक्षाणांशास्त्रमार्गेणयोजनं सिद्धमंत्रस्यसंप्रोक्तो विनियोगोविचक्षणैः पुरश्चरणपूर्वोसौविनियोगोविनिर्मितः फलायमंत्रसेवायाराजसेवायथातथा चरणात्पूर्वमेवासौपुरश्चरणमुच्यते इति एतेनविनियोगाख्यकर्मसामर्थ्यजनकक्रियारूपेहिकामुष्मिकमंत्रात्मशुद्धिहेतुक्रियावापुरश्चरणमित्युक्तं अत्रकेचित् प्राप्येनांजपविधिरादेरणकार्योविदग्धैःसऊनविधीर्नजेस्वसिध्यै इतिदोषाप्रकरणेभिधायमध्येमध्येपितत्तत्प्रकरणेपूजाजपहोममेवाभिधायमंत्रेणादेकताभिश्रुतिभिरजपध्यानहोमार्चनादिभिरुत्तरोत्तरंहारेष्वपंचसारकारैःश्रीशंकराचार्यैश्चरणेभिधानात् शारदातिलकेऽपिसर्वत्रपूजाजपहोमानभिधायप्रयोगाभिधानात् नाजपात्सिध्यतेमंत्रोनाऊनिश्चफलप्रदः अर्चनैर्नाहरेत्कामांस्तमाद्वितयमाचरेत् इतिफुल्लप्रकाशतंत्रेवचनात्त्वंगत्रयात्मकं

परश्चरणमितिवदंति अन्येतु संसारेऽुःखभूयिष्ठेपरिछेक्ष्येयमात्मनः पंचांगोपासकेनैवमंत्रजापीसुखंव्रजेत् पंचांगा
निमहादेविजपहोमश्चतर्पणं स्वाभिषेकश्चविप्राणामाराधनमपीश्वरी पूर्वपूर्वदशांशेनपरश्चरणमुच्यते इतिऊलमूला
वतारवचनात् पंचांगंवदंति अन्येतु मूलमंत्रदशांशःस्यादंगमंत्रजपादिकं इतिकपिलवचनात् जपांगानांदशांशेन
कर्त्तव्यःसिद्धिमिछता इतिवायवीयसंहितावचनाच्चषडंगंवदंति इतरेतु जपहोमस्तर्पणंचस्वाभिषेकोद्यमर्पणं सूर्या
र्घजलपानंचप्रणामंदेवपूजनं ब्राह्मणानांभोजनंचपूर्वपूर्वदशांशतः दशांगोपासनंभक्त्यापरश्चरणमुच्यते इतिसा
रसंग्रहवचनात्दशांगंवदंति तथा यश्चाजपत्चतुर्थांशंस्वाहांतंमंत्रमुच्चरन् इतिवैशंपायनसंहितावचनात् वर्णलक्षं
जपेन्मंत्रनत्सहस्रंघृतप्लुतैः पायसान्नैःपलाशसमिद्भिर्यजुरुक्तादितिशारदातिलकवचनात् क्षेत्रांतरेजपस्याष्टभागहोमेनसिद्धति
इतिदक्षिणामूर्त्तिकल्पवचनात् जुहुयात्तद्दशांशेनसघृतैस्तिलतंडुलैः इतिसारसंग्रहवचनाच्च होमस्यानियमत्वात्
तर्पयेत्तद्दशांशेनसघृतेनपयोधसा कुर्याद्दशांशतोहोमंततःसिद्धोभवेन्मनुः इतिसनत्कुमारवचनात् तर्पयेत्तावदत्ये
वांमनूनांऊतसंख्यया तर्पणंविहितंनित्यमितिशैवागमवचनाच्च तर्प्पणस्यापिनियत्वात्तत्तत्कल्पोक्तमेवपरश्चरणयुक्त
मित्यस्यासिद्धत्वंतः अथजपनिर्णयः तत्रवैशंपायनः यस्मिंश्चनिगदेनैवमंत्रेसंख्याविधीयते तत्रसर्वत्रमंत्राणांसं
ख्याकृद्भिर्युगक्रमात् कल्पोक्तैवकृतेसंख्यात्रेतायांद्विगुणाभवेत् द्वापरेत्रिगुणाप्रोक्ता कलौसंख्याचतुर्गुणेति रुद्रयामले

पजपेद्दक्षसंख्यायाचतुर्गुणाजपंकलाविधि अत्रकेचिदेतेनंप्रपंचसारशारदातिलकाद्युक्तजपस्यापिचतुर्गुणादिना
कलौपुरश्चरणमितिवदंतितच्च नारदपंचरात्रादिस्वीनान्प्रपंचसाराद्युक्तजपश्चतुर्गुणस्य तथानारदपंचरात्रे मार्ग
शीर्षस्यमासस्यशुक्लपक्षस्यैकमेववा उपोष्यशुक्लद्वादश्यांमारभ्यषडक्षरंजपेत अयुतलक्षमविच्छिन्नंपुरश्चरणंकृत्विजः
शुक्लाकारःशुचिःस्नातोवाग्यतोविजितेंद्रियः मंत्रसिद्धिरहस्याथीलक्षद्वयजपान्नवेत् ततोपिद्विगुणाभ्यासादैहिकामुष्मि
कीवसा एवमेवात्मशुद्धिःस्यादेतावत्प्रथमेयुगे त्रितायांद्विगुणाप्रोक्तोद्वापरेत्रिगुणंभवेत् तथा कलौचतुर्गुणाप्रोक्तो
द्वात्रिंशल्लक्षलक्षणाः अदृष्टार्थामंत्रसांमुख्यकरीएहिकीहलोकसुखदा आमुष्मिकीस्वर्गलोकादिसुखप्रदा आत्मशु
द्धिस्तत्त्वज्ञानसाधनभूतासिद्धिरिति एवंद्वात्रिंशल्लक्षंअतएवद्वात्रिंशल्लक्षमानेनसन्मंत्रंजपेत् पुनरित्यार्यचरणोक्त
कंतथाज्ञानार्णवे बालाप्रकरणे वर्णलक्षंजपेन्मंत्रंतदशांशंहुनेत्प्रिये इतिबालायामभिधायन्यासपूजादिकंसर्वमस्याः
पूर्ववदाचरेदिति भैरव्यामिनिदिष्टेलक्षत्रयजपंचतुर्गुणीकृत्य दीक्षोप्राप्यजपेन्मंत्रंतत्वलक्षंजितेंद्रियः इतिभैरव्याम
भिधाय्यबालायांतावदेषाबालेतिविख्याताचैलोक्यवशकारिणी जपपूजादिकंसर्वमस्याःपूर्ववदाचरेदितिशारदातिलकेकृ
ताद्दितिदिष्टं तत्वलक्षंद्वादशलक्षं अतोद्वादशतत्वानिवदंत्येकेविपश्चितः इतिप्रयोगसारवचनात् इति तथाप्रपंच
सारे भैरवीप्रकरणे दीक्षांप्राप्याविशिष्टलक्षणयुजःसन्सुप्रसन्नायगुरोर्लब्धामंत्रमनुंजपेत्सुनियतस्तत्त्वार्थलक्षंवशी

इतिद्वादशलक्षमुक्तं तथालक्षत्रयंजपेन्मंत्रमिनिरक्षिणामूर्तिसंहितायामुक्तस्त्रिपदामंत्रस्यजपेत्रमंत्रमाद्यित्पलक्षमिनि
भाजुलक्षंजपेदेनमिनिचप्रपंचसारशारदातिलकयोश्चतुर्दशाजपस्यात्राभिहितः तेनैकत्रनिरूपितइतिन्यायेनसर्वत्रचतुर्दशा
एवाभिहितइतिनिरूपितंनचतद्दर्दसंख्यकंवापिभद्रकारोजितेंद्रियः इतिप्रपंचसारेर्द्दजपाभिधानविरोधइतिवाच्यं
उक्तंनारदवचनेनैवास्यैहिकसिद्धिपरत्वात्सामुष्मिकपरत्वाद्वाविरोधाभावादिनि प्रपंचसारे समुद्रनीरेयथावाद्रिभृं
गेसमुद्रगाणांसरितोचनीरे जपेद्विविक्तेनिजस्वगेहेविघ्नोर्गहेवापुरुषोत्तमस्यीसमुद्रसाम्यादेव अन्यथासर्वासा
मपिपरेपरमानथात्वाद्विविशेषणवैय्यर्थादिति मनस्वीश्रद्धावान्सनत्कुमारः नद्याःसमुद्रगामिन्यास्तीरेगोष्ठेनथाम
ने अश्वत्थविल्वमूलेवासिंधुतीरेजलाशये पश्चिमाभिमुखेदेवगृहेवाशैलमस्तके देवःशिवः प्रत्यक्षशिवस्थाने
वृषभेराविवर्जिते इतिकुंभसंभववचनेकवाक्यात् नारदपंचरात्रे गिरिगोष्ठपविस्पंदनधररापाश्रमाऊदा देशाः
पुरापाःजपस्थेनेयत्रवाजायतेऽरुचिः पविस्पंदःप्रस्रवणंनदीपुरापनदीतीरं अररापंपुरापारापंपुष्करार्द्रादिपावनंव
नमिनिशारदातिलकात् त्रैलोक्यसंमोहनतंत्रे विल्वछायांसमाश्रित्यमूलेश्वत्थस्यवाथिये गुरोर्वासन्निधौगोष्ठेवृष
भूस्थेशिवालये नदीतीरेऽथभृंगेवातुलसीकाननेपिवा अग्निरुद्रदेवसान्निध्येजपेन्मंत्रंसमाहितः नदीतीरे पुरापनदी
तीरे अत्यनदीतीरस्यनिषिद्धत्वात् कपिलपंचरात्रे क्षेत्रतीर्थनदीरम्यदेवालयनदीऊदाः ऊरीविविक्तइत्येतेदेशा

राम
२

सुमंत्रसिद्धिदाः वायवीयसंहितायां सूर्यस्याग्नेर्गुरोरिंडोर्दीपस्यज्वलितस्यवा विप्राणांचैवदेवानांसंनिधौसप्तमेनजपः
अथवानिवसेत्तत्रयत्रचित्तंप्रसीदति गृहेजपःसमःप्रोक्तोगोष्ठेदशगुणोजपः आरामेचतथारोपेसहस्रगुणाउच्यते
अयुतंपर्वतेप्रोक्तंशतलक्षगुणास्मृतः कोटिर्देवालयेप्राहुरनंतंममसन्निधौ ममशिवस्य तथाशंखः अनंतेविष्णुसं
निधौ यामले म्लेच्छाद्यसंगावालशंकांतंकविवर्जिते एकांतेयावतेनिंदारहितेभक्तिसंयुते सुदेशेधार्मिकेराष्ट्रे सु
भिक्षेनिरुपद्रुते रम्येभक्तजनस्थानेनिवसेन्नपराश्रमे राजानःश्रोत्रियाराजपुरुषाःप्रभवोजनाः चरंतियेनमार्गेण
नवसेतत्रतत्रवित् जीर्णदेवालयोद्यानगृहक्षेत्रतलेषुच नदीकूलाद्रिकूलेषु भूछिद्रापिंडनोवसेत् पुष्पक्षेत्रादिकं
गत्वाकुर्याद्भूमिपरिग्रहं द्यात्मुकमंत्रस्यपरश्चरणसिद्धये मयेयंगृह्यतेभूमिमंत्रोमेसिध्यतामिति भूमेपरिग्रहं
कृत्वापरिमाणंचसर्वतः नदीपर्वतनोर्थांतैपरिमाणेनखंडितं ग्रामेक्रोशमितेस्थानेनगरेनद्यंस्मृतं क्षीरवृक्षम
याकीलानस्त्रमंत्राभिमंत्रितान् निस्वनेदशदिग्भागेतेषुस्त्रंचप्रभूजयेत् क्षेत्रेचकीलितेमंत्रीनिर्विघ्नःपरिभूय
ते क्षेत्रपालादिकांस्तत्रपूजयेद्विधिवित्तमः दिक्पतिभ्योबलिंदत्वानतःक्षत्रंसमाश्रयेत् क्षेत्रमध्येसमाश्रित्य
कूर्मचक्रंविचिंतयेत् कूर्मचक्रमविज्ञायययःकुर्याज्जपजप्तकं तज्जप्यस्फलंनाप्तिसर्वानर्थायकल्पते सारसंग्रहे
कूर्मस्थितिंपरिज्ञायपोजपादिविधेस्थितः सभाग्नोतिफलान्सुक्ष्मान्यथानाशमेतिच तस्मात्कूर्मविभागंतुविज्ञाया

शि.चं
१

रिवलमाचरेत् सचनुर्द्धास्थितोलोकेनत्रकारस्तथोच्यते प्रथमस्तूपरः कूर्मस्तदोदेशगतस्तथा यामगोगृहगश्चेतिस
चनुर्द्धाव्यवस्थितः देशंग्रामंगृहंवाथनवधाविभजेत्पुनः प्रागादिपश्चिमानंतकादिसांतानिविन्यसेत् अक्षेरारूपथया
दीनिलथाशौदलयोर्लिखेत् ईशोद्वयमधोमध्येस्वरान्प्रागादिविन्यसेत् ईशांतासुदिशःपश्चान्नामाद्यक्षरतोभवेत्
तन्मुखंपार्श्वयोपाणिऊरूपादौतनस्ततः मुद्धमेकमधोमध्येपृष्ठमेवंषडंगवान् मुखेसर्वार्थसिद्धिःस्यात्करयोरल्प
सिद्धिः ऊरूौतुनित्यनैष्फल्यंपादयोर्नैवसिद्धिः पृष्ठेमृत्युरूनियतःपृष्ठेसर्वार्थसिद्धिदाः तस्मात्तस्माअविज्ञायन्तु
र्यात्सर्वजपादिकं तंत्रराजे व्यंजनंदेशकूर्मस्याद्रुकूर्मेश्वरास्तथा ग्रामकूर्मेतद्वितयंपरकूर्मेनतुद्वयं नित्यंपूर्व
मुखोयस्यात्तेननत्सिद्धिरीरितेति स्वरव्यंजनमुक्तेपिदेशानामनिव्यंजनप्राधान्यंदेशकूर्मज्ञेयंतथाग्रामकूर्मेपिस्वरस्ये
ति केवलस्वरमुक्तेतुसर्वत्रस्वरस्यदिक्कोशमुखंज्ञेयं देवीयामलेऊरुक्षेत्रेप्रयागेचगंगासागरसंगमे महाकालेच
काश्मीरेचदीपस्थानंनचिंतयेत् एतच्चक्ररचनाप्रकारःप्रयोगेवश्यने सिद्धेश्वरीतंत्रे तस्मान्मुखंसमाश्रित्यसर्वका
र्यंसमारभेत् तद्भावेकरंवापिकूर्मस्थानेसमाश्रयेत् कालिकोक्षवे स्थानसाधकयोर्नान्योरविर्त्वयत्रविद्यते तद्द
क्षशास्त्रतोज्ञात्वातत्तत्सम्यक्परित्यजेत् अक्षशास्त्रे अलित्वमथद्वयस्योक्तंगकारेणपरस्परं ऋद्वयस्यउकारेण
वकारस्यापिनेनच लृद्वयस्यपकारेणयकारस्यापिलृद्वयं ओद्वयस्यषकारेणशकारस्यौउगेनच जकारस्यटकारेणउका

रामः
२

रस्यखकारतः उकारस्यतकारेणाफकारस्यधकारतः अकारस्यतुरेफेणायकारस्यसकारतः अरित्वमेषांवर्णानांमन्ये
षांमित्रभावना कूर्मचक्रेरिपुस्थानंसाधकोयत्नतस्त्यजेत् यथागर्गस्यवैरीस्यादृहासंमरुत्पुरं गयामरुेश्वरस्येवभा
स्कराद्येषुयोजयेत् ऋजुमरुत्पठक्कारखंलनकस्यादिपञ्चकं ओडियानंधरस्यखस्यऔड्डंघडुराकस्यच जयतीटंकरा
स्यारिखंधारेरुंडुरास्यत डाकदेवस्यनाराख्यंधर्माख्यंफंजिभरुतः भडस्यरम्यकंवैरीयज्ञदत्तस्यसोमकः सर्वंक्रमेणा
संशोध्यवैरिस्थानंत्यजेद्बुधः क्षेत्रसाधकमंत्राणामेकमेवाद्यमक्षरं यदिस्यात्तत्कुरुंमंत्रंसर्वसिद्धिफलप्रदः अथजप
माला सातद्विधा मातृकाक्षरमयीरुद्ररुद्राक्षादिमणीमयिचइति तत्रप्रथमामाहुसारसंग्रहे अकारादिक्षकारां
तैर्विंदुयुन्मातृकाक्षरैः अनुलोमविलोमस्थैःकृत्तवावर्णमालया प्रत्येकवर्णीयश्चात्राजप्तास्युःक्षिप्रासिद्धिदाः वैरिमं
त्राअपिचरणेसुसिद्धायस्तत्किंपुनरिति तत्रप्रकारमाहकुलमूलादतारे ब्रह्मनाडीगतानादीक्षांतान्वर्णान्विभाव्यच
वर्णेविंदुयुतंकृत्वास्वेष्टंमंत्रंजपेत्सुधीः अकारादिषुसंयोज्यतथाकादिषुचक्रमात् क्षार्णमेरुमथोत्तरकल्पयेज्जगदीश्व
री तदालिपिभवेदक्षमालार्द्धशतसंख्यया अनयासर्वमंत्राणांजपःसर्वार्थसिद्धिदः क्षंकारंमेरुसंस्थानेलकारादि
विलोमतः एकैकांतरितंमंत्रंजपेदेवंफलप्रदमिति अत्राष्टोत्तरसहस्रंवाष्टोत्तरशतंवायदाजपःकार्यस्तदा वर्णाष्टकवि
भेदेनजपेदष्टोत्तरंशतंइति अक्षमालाशब्दस्त्वेवमुख्यः उक्तंचशारदातिलके आदिक्षांतार्णयोगिन्याद्यक्षमालेतिकी

क्षिनोति ज्ञानारणीवेपि अकारःप्रथमोदेविक्षकारोन्तस्ततःपरं अक्षमालेतिविख्यातामातृकावर्णरूपिणीति अत्र
वर्णैकजपस्तुदिग्दशनादिसंख्यावसानेकार्यः यदुक्तंमातृकार्णवे आरभ्याकारमादौमनसिपरिजप्येन्मातृकासावसा
नीं धृत्वानन्तावसानोपुनरपिचषष्ठेदंतमेवावरोहे लोमानखौचवर्यौसदृक्परिजपेदूर्ध्वस्यावसानेह्यंतसंहारसृक्रूपश्च
पतिगदितायामलेमालिकेयं धृत्वामेरुस्थानेत्रवसानेक्षकारं कृत्वटतपयशलास्यात् नरन्यूस्यसंख्यासमान्नन
तरं अवसानउद्दिग्दशनादिसंख्यावसानेस्रवावधारणो द्वितीयानुसारसंग्रहे अथवक्षेक्षमालाचाविधानेमंत्रि
काम्यया पंचविंशतिभिःप्रोक्तामणिभिर्भक्तियायिनी त्रिंशद्भिर्धर्मदासन्नविंशान्वक्षैस्तुसर्वदा अभिचारकरीपं
चदशभिःकल्पितानुसा चतुःपंचाशदक्षैःसाकाम्यकर्मसुसिद्धिदा अशेषनरशत्रुःक्षुत्रासवीभीरुप्रदामता मरा
यःशंखसंभूताःप्रोक्तालक्ष्मीप्रदायकाः भुक्तिप्रदास्फाटिकजापमाक्षापुष्टिवर्द्धना भुक्तिमुक्तिप्रदाप्रोक्तासर्वसंप
त्समृद्धिदा पापापहाःकुशमयाकाम्यदास्वर्णरौप्यजा नथाशारदानिलके रुद्राक्षमालिकासूत्रेजपेनसुमनोर
थान् पद्माक्षैर्विहितामालाशत्रूणांनाशिनीमता कुशग्रंथिमयीमालासर्वपापप्रणाशिनी पत्रजीवफलैःकृत्वा
कुरुतेपुत्रसंप्रदं निर्मितारूप्यमणिभिःजपमालेप्सितप्रदा हिरण्मयैर्विरचितामालाकामानवयच्छति प्रवालैर्विहि
तामालाप्रयच्छेत्सुखंधनं सौभाग्यंस्फाटिकीमालामौक्तिकैर्विहिताश्रियं निर्मितांशंखमणिभिःकुरुतेकीर्तिकंवय

न सर्वैरनैर्वरविनामालास्यान्मुक्तयेनृणां मिश्रेणानुनिषेधमाह उत्तरतंत्रे रुद्राक्षैर्यस्त्रिजप्येतरुद्राक्षैस्फटिकैस्त
था नान्यमंत्रेषयोक्तंपुत्रजीवादिकंचयत् यद्यत्तत्रप्रजप्तेनमालायांजपकर्मणि तत्फलंचमोक्षंचनददातिप्रि
यंकरी जन्मांतरेजायतेसौवेदवेदांगपारगः मिश्रीभावंततोयातिचांडालैःपापकर्मभिः श्रीनिवासयामले रक्त
शृंगस्यमालापितॄणांमोक्षदायिनी निशादावीकृतावश्येलाभयाज्वरकर्मणि अर्कस्योच्चाटनेकार्यीश्रीफलैर्ज्ञानसा
धने गजदंतस्यमणिभिःकुर्यात्सर्वार्थदायिनी राजनीसर्ववश्येषुमोहनेनाम्रजास्मृता मारणेचायसीप्रोक्तेति श्रीफ
लेविल्वकाष्ठजैः विल्वशांडिल्यशैलूषमायूरश्रीफलावपिश्रीतकोशान् सारसंग्रहे साप्यनेकविधाप्रोक्तासात्विकी
राजसीतथा तामसीचेतितत्त्वाद्याश्चतैरश्चोत्तरैःशुभैः मणिभिःशंखसंभूतैःश्वेतपद्मसमुद्भवैः बीजैर्मुक्ताफलैःपु
त्रजीवैरजातसंभवैः श्वेतचंदनसंभूतैरन्यैश्वेतसमुद्भवैः कुशग्रंथिभवैःकुत्साराजसीचनुरोत्तरैः पंचाशद्भिरक्त
पद्मबीजैरारक्तचंदनैः सौवर्णैरक्तनरुजैःपीतसारसमुद्भवैः पद्मकाष्ठसमुद्भूतैःरजनीकाष्ठसंभवैः देवदारुस
मुद्भूतैःकृष्णकाष्ठसमुद्भवैः मणिभिस्तामसीवाष्टाविंशद्भिर्मणिभिःकृता साशमीनिंबीनिंबवाल्वकुंडभद्रसमुद्भवैः
कपिशाईलवृक्षाणांजंतूनामस्थिसंभवैः नराश्वरासभेभानांत्वायुभिर्ग्रथितैरपि तत्तत्कार्यविभेदेनसासाकार्या
विपश्चिताऽति कुशग्रंथिमालानुद्वालवणानामेव कुशग्रंथ्याजपेषिप्रसुवर्णमणिभिर्नृपः पुत्रजीवेजपेत्कृष्णःपद्मा

सर्वेष्वेवच इति नारदवचनात् गोपालमंत्रजपप्राप्तमनीवप्रशस्तं गोतमेनतन्त्रविधानात् तथा समाहितमनाभूत्वापमणीजाप्यमालया जपेदिति नारदपंचरात्रेपि जपस्यगणनांशाऊपप्राप्तैर्भक्तिवर्द्धनैः इति यैस्तवानामपिरुद्राक्षमालातीवप्रशस्ता यस्तुभागवतो भूत्वेतुपक्रम्यरुद्राक्षैश्चोत्तमादितिवराहवचनात् अथजपमालायाःसंस्कारकालः तत्रयोगिनीतंत्रे शारदार्चनवैष्णवीमालाकर्त्तव्यासाधकोत्तमैः मंत्रैर्विसुमंत्रेणादिव्यभागेप्रयत्नतः दिव्यभागेपूर्वोक्तशक्तीनामपिकर्त्तव्या भुक्तारात्रौयथाविधि भोजनंतुदिवसएव अशुभांचनवर्मांवत्रुदर्शनंतथैवच त्रयोदशंतथाऊर्ध्वोछिवस्यापिमहेश्वरी चतुर्थ्यांगणनाथस्यमध्याह्नेभास्करस्यतु पूर्वाह्णेदेविकर्त्तव्यासन्नस्योजगदीश्वरीति अथसूत्रार्णिनत्वेव पट्टसूत्रकृतामालादेव्याप्रीतिकरीसदा कार्पासैःवैष्णवीमालापट्टसूत्रैरथापिवा कुर्णाभिर्वल्कलैर्वापिशैवीमालाप्रकीर्त्तिता कार्पासंसूत्रैरन्येषांविदध्याज्जपमालिकां कार्पाससूत्रेविशेषमत्रैव ननोद्विजेन्द्र उपरक्तेनिर्मितंग्रंथिवर्जितं त्रिगुणंत्रिगुणीकृत्यसूत्रंषोडशात्मकंततः कालोत्तरे स्कंदउवाच देवदेवमहादेव सृष्टिस्थितिलयेश्वरः रुद्राक्षैर्जपमालातु कथंकार्यामहेश्वर संस्कारश्चकथंतासांकर्त्तव्यःकीदृशंफलं ईश्वरउवाच शृणुषण्मुखवक्ष्यामिरुद्राक्षैःक्रीयतेयथा जपमालाविधानेनयेनसाजपसिद्धिदा एकवक्त्रंद्विवक्त्रंश्चत्रिवक्त्रंश्चपंचभिः षड्वक्त्रंवाथकर्त्तव्यामिथोनिघ्नांस्तुवर्जयेत् मुखेमुखंतुकर्त्तव्यंमूलंमूलेविसर्जयेत् रुद्राक्षसंख्या

न्नतप्रोक्तंमुखेदृष्ट्वानिम्नकं धात्रीफलप्रमाणोनश्रेष्ठमेतदुदाहृतं वदरोदुप्रमाणोनवराकान्मध्यमाधमैः दुर्द्ध
वक्त्रंतुमेवीरव्यंकर्त्तव्यंतंनलंघयेत् नवत्रितंतुनाचैनंकुथनीयमसंस्पृशन् अस्पर्शित्वान्योन्यस्य उत्तरतंत्रे एको
मरुत्तत्रदेयःसर्वेभ्यःस्थूलसंभवः आद्यंस्थूलंततस्तस्मान्मूनंन्यूनतरंतथा विन्यसेत्क्रमतस्तस्मात्सर्पाकारावसा
यतः श्लक्ष्णंग्रंथिसुतंकार्योऽनिवोजंयथाविधे अथवाग्रंथिरहितंदृढरज्जुसमन्वितं त्रिरावृत्याथमध्येनैवाद्धि
कृत्यानदेशतः ग्रंथिप्रदक्षिणावर्त्तःसश्लक्ष्णग्रंथिसंज्ञितः तथाकालोत्तरे स्थाभक्रंविधायाथसाधकोऽथयेत्त्वयं
कृतनित्यक्रियःशुद्धऊर्द्धवस्त्रेषुमंत्रवित् यथालाभंतथालाभमक्षाणापानीयमुत्तमं ततः वक्त्रसोकर्यकर
णायत्नयुक्तः अन्योन्यस्पृष्टरूपाणिनातिस्थूलकृशानिच कीटादिभिरदुष्टानिनजीर्णानिनवानिच गव्यैस्तु
पंचभिस्तानिप्रक्षाल्यपृथक्पृथक् आसेपूर्वदिनेअक्षान्रुद्राक्षान् यथाकामंवक्त्रभेदेनफलभेदश्चवर्णा
न् शक्तिव्यतिरिक्तमेकभक्तंजेयं पंचगव्यंतुनसिंहपुराणे दुग्धंकांचनवर्णायाश्वेतायाश्चैवगोमये गोमूत्रं
ताम्रवर्णायानीलायाश्चभवेद्दधि घृतंवैक्रूष्मवर्णायादृत्येतत्पंचगव्यकं गवांघृतंसुलभाःसंतिदेशेषु
सत्रच तत्रवर्णविभागेनपंचगव्यानिचाहरेत् वर्णालाभेनदोषोस्तिमाचाहीनंतुवर्जयेत् गोशृंगद्विपुरांमू
त्रंसर्पिर्दध्याह्नतुर्पुरं क्षीरमशुद्धांप्रोक्तंपंचगव्येनथादधि गायत्र्यादायगोमूत्रंगंधद्वारेतिगोमयं आप्या

शि चं ६

यस्येतिचक्षीरंदधिक्रांतोऽत्वादधि तेजोऽसिशुक्रमित्याज्यंदेवस्यत्वाकृशोदकमिति प्रक्षाल्येत्तुक्रंविष्णुरो
तिस्वयमेव सद्योजातेतिमंत्रेणाक्षालयेत्पंचगव्यकं पंचगव्येऽजलेश्चक्षालयेत्पंचगव्येनसद्योजातेनसजलैरिति
तत्वसारवचनात् चंदनागुरुगंधाद्यैर्वामदेवेनघर्षयेत् धूपयेदथघोरेणाकृष्णागुरूसगुग्गुलैः ननुरुद्धारव
मंत्रेणालेपयेच्चंदनादिभिः आदिभिःआदिपदेनकर्पूरकस्तूरीकुंकुमादीनिगृह्यते मंत्रयेत्पंचमेनैवप्रत्येकंशतं
शतं मेरुंचपंचमेनैवतथाघोरेणामंत्रवित् शेवागमे अभ्वत्थपत्रनवकैःपद्माकारेणाकल्पयेत् सूत्रंमणिंश्वगं
धाद्भिःक्षालितांस्तत्रनिक्षिपेत् नारंशीकंमातृकांचसूत्रेरुद्राक्षकेषथ विन्यस्यपूजयेदाज्यैर्जुहुयाच्चैवशक्तितः
मणिमेकैकमादायसूत्रेतत्रनियोजयेत् गोपुच्छसदृशीकार्यैकाग्रावास्तमेरुका एकाग्रासमरूपा मुद्राश्च
कंदर्शयित्वाप्रत्येकंपूजयेत्क्रमात् ग्रथितंपंचभिर्मंत्रैःपूर्ववच्चयथाशिवे मंत्रैःसद्योजातादिभिः होमेप्येभि
रेवमंत्रैःपूजाहोमयोरेकमंत्रस्यावश्यकत्वात्मुद्राऽकंदृष्ट्वावाहनादिअनंतरपूजाभिधानात् अन्यमणिसंस्प
र्यसंस्कारः इतिवदंति तदज्ञानविजृंभितः रुद्राक्षाणामयंशेषःसंस्कारःश्रुतिचोदितः इतरेषुनंशेषःक
र्त्तव्योगुरुसाधकैरितिकालोत्तरवचनादेव अथरुद्राक्षमाहात्म्यंनउत्पत्तिमुखभेदान्फलानिचनानापुरा
णेषु तत्रस्कंदपुराणे त्रिपुरोनामदैत्यस्तत्पुरासीदितिउर्जयः जितास्तेनसुरास्तर्वेब्रह्मविष्वीन्द्रदेवताः त्रि

रामः ६

परस्यवधार्थायदेवानांप्राणिनायच लोकानांभयनाशायस्वधर्मप्रवृत्तये सर्वदेवमयंदिव्यंज्वलितंघोररूपकं
चिंतितंस्मान्मयापुत्रअघोरास्त्रमनुत्तमं नरयातस्यभार्यायाश्चावधावदद्रुपत दिव्यवर्षसहस्राणिचक्षुरुन्मीलितंम
या प्रयाभ्यामश्रुलाक्षीभ्यांपतिताजलबिंदवः तत्राभ्रविंदवोजाताम्हारुद्राक्षवृक्षकाः स्थावरत्वमनुप्राप्यमर्त्यानुग्रह
कारणात् फलंतिसर्वकालंहिअविछिन्नफलप्रदा वाशिष्ठलेगे ब्रह्मेंद्रमरुत्सकलामररक्षणार्थंत्रिपुरासुरविम
र्दनकृत्यकाले तत्रेपरक्षरणानिरोधभयाब्धिवारिरुद्राक्षवृक्षनिकरणिनसंभवभूवुः रुद्राक्षात्कंठदेशेदशनपरिमि
तान्मस्तकेविंशतिद्वेषट्षट्कसंख्याप्रदेशेकरयुगलगतान्द्वादशद्वादशैव याकोटिरोकलाभिःपृथगितिगदितंचैक
मेकंशिखायांवक्षःस्थाधिकंयःकलयतिसतकंसत्वयंनीलकंठः रुद्राक्षबीजमितियेभुविधारयंतिहस्तेचमूर्ध्नि
नितथोरसिभूमिभागे तेषांनसंतिसदृशायसपन्ननेत्रपन्नासनेनसुरकिंनरपट्टशेषु शिरोमालाचषट्त्रिंशत्स्या
त्त्रिंशत्कंठमालिका कूर्परेषोडशेप्रोक्ताद्वात्रिंशन्मणिबंधयोः अष्टोत्तरशतैर्यज्ञमुपवीतंविधीयते तदर्द्धसरसो
मालाशिखायामेकमुच्यते करीयोत्थापिषट्संख्याधारणाक्रमईरितः संख्याहीनंनकर्त्तव्यमधिकंनैवदूष्यति
संख्याभेदंप्रवक्ष्यामिजपमालानुयाभवेत् मोक्षार्थेपंचविंशत्यासप्तविंशतिपौष्टिके त्रिंशद्धनसंपत्तेपंचदशाभि
चारके ब्राह्मणःक्षत्रियोवैश्यःशूद्रश्चेतिचतुर्विधः श्वेतारक्तसवर्णाभकृष्णवर्णाक्रमात्स्मृतेषुब्राह्मणाःश्वे

रोजपमालाकृतेभद्रं अलाभेतुद्विजातीनांपविवास्वस्वजातयः अतिस्थूलोतिसूक्ष्मश्चस्फुटितोमंडलोलघुः
भिन्नःप्रशस्तोजीर्णोरुद्राक्षोनवरःस्मृतः मणौयद्वन्नतंस्यानंमुखेपृष्ठंतुनिम्नकं घटयेदेवस्त्रत्सनणीन्नहंतप
क्तिवत् अन्योन्यघर्षणादेवजपहानिर्भवेध्रुवं श्रेष्ठेनरज्जुनातेनवर्त्तनत्रयरूपतः अन्योन्यमध्यदेशेतुकर्त्तव्याग्रंथ
यःशुभाः चतुर्दशंतवक्त्राणिरुद्राक्षाणांक्रमान्नवेत् धारणात्सफलंतेषांवक्ष्यतेविधवक्रमात् एकवक्त्रःशिवः
साक्षाद्ब्रह्महत्यांव्यपोहति द्विवक्त्रंदेवदेवेतुगोवधंनाशयेध्रुवं त्रिवक्त्रमनलःसाक्षात्स्त्रीहत्यांहरतिक्षणात्
चतुर्वक्त्रःस्वयंब्रह्मापुरुहत्यांव्यपोहति पंचवक्त्रःशिवःसाक्षात्सर्वपापैःप्रमुच्यते षड्वक्त्रकार्त्तिकेयस्तु धारयेद्दक्षि
णेकरे ब्रह्महत्यादिभिःपापैर्मुच्यतेनात्रसंशयः सप्तवक्त्रंमहानागोह्यनंतोनामनामतः गोवधःस्वर्णचौर्याभ्यांमुच्य
तेसर्वदानरः अष्टवक्त्रंमहासेनसाक्षाद्देवोगणाधिपः विघ्नास्तस्यप्रणश्यंतिसंतेयानिपरांगनां नववक्त्रंभैरवः
स्याद्धारयेद्धामहस्तके भक्तिस्तंभक्तिदंप्रोक्तंममतुल्योबलोभवेत् दशवक्त्रंभवेन्नहत्साक्षाद्देवोजनार्दनः पिशा
चग्रहवेतालब्रह्मराक्षसपन्नगैः संभवानिचदोषाणिक्षिप्रंनश्यंतिधारणात् वक्त्रैकादशरुद्राक्षंरुद्राएकादशाः
स्मृताः शिखायांधारयेन्नित्यंतत्सपुण्यफलंश्नुते अश्वमेधसहस्रस्यवाजपेयशतस्यच गवांशतसहस्रस्यस
स्नानस्ययत्फलं तत्फलंसमवाप्नोतिवक्त्रैकादशधारणात् वक्त्रद्वादशरुद्राक्षंभास्करद्वादशात्मकं वक्त्रस्वर्णं

श्वगोमेधफलंप्राप्नोतिधारणात् वक्त्रत्रयेरुद्राक्षंयदिधारयेत् पूज्यतेसततंदेवैःप्राप्यतेपुरुषमुत्तमं
चतुर्दशमुखंरुद्राक्षंधारयेद्यदि मूर्द्धिस्थितेनतुचेन्निपतंतस्मिन्योम्रियतेनरः पवित्रमपवक्त्रस्यशिरवंउशि
राःस्वयं वंयतेसततंदेवैःसप्तंचश्राद्धशतमुक्त वक्त्रलेप्राप्यतेपुरुषंभोग्यवान्जायतेनरः स्नानेदानेजपेहोमेवै
श्वदेवंसुरार्चने प्रायश्चित्तेतथाश्राद्धदीक्षाकालेविशोषतः रुद्राक्षधारीभूत्वाचयत्किंचित्कर्मवैदिकं योवि
प्रःसततंकुर्यान्नतत्कर्मफलंभवेत् पद्मपुराणे कंठेशिरसिहस्तेचकर्णयोरुपवीतके रुद्राक्षधारणादेवरुद्रोग
वतिमानवः शैवपुराणे रुद्राक्षान्धारयेद्विप्रःसंध्यादिषुचकर्मसु तत्सर्वंसफलंप्रोक्तंलक्षकोटिगुणंध्रुवं
लिंगदर्शनवत्पुराणेभवेद्रुद्राक्षदर्शनात् तनुकोटिज्ञानंपुराणेलभतेधारणान्नरः शिरसाधारयेत्कोटिकर्णयो
र्दशकोट्यः वलेवध्याकोटिज्ञानंमूर्द्धिकोटिसहस्रकं अयुतंचोपवीतंचलक्षकोटिभुजद्वये अप्रमेयफ
लंहस्तेसरुद्राक्षधरोभवेत् लैंगेवाशिष्ठे खादन्मांसंपिवन्मद्यंगछंतंत्यजजातिभिः सद्योभवतिपूतात्मारुद्रा
क्षोशिरसिस्थिते स्कंदपुराणे रुद्राक्षंकंठमाश्रित्यश्वानोपिम्रियतेयदि सोपिरुद्रत्वमाप्नोतिकिंपुनर्मानु
षास्यः उद्धिद्योवाविकर्मस्थोपुक्कोवासर्वपापकृत् मुच्यतेसर्वपापेभ्योनरोरुद्राक्षधारणात् रुद्राक्षमालिका
कंठेधारयेद्भक्तिवर्जितः पापकर्मापियोनित्यंरुद्रलोकेमहीयते शैवपुराणे अरुद्राक्षधरोभूत्वायत्किंचि

त्कर्मवैदिकं कुर्याद्विप्रस्तुत्योमोद्यान्नामायाग्नेतितत्फलं वाशिष्ठलैंगे रुद्राक्षधारणोलज्जायेषामतिमहान्
ने संकीर्णासाभवेद्ब्रह्मन्तेषांवंशपरंपरा अथान्येषामक्षविशेषाणांनुयोगिनीतंत्रे उक्तेष्वक्षेषूक्तस्त्रैर्थितां
साधकोत्तमैः मालांनिधायवैपात्रेक्षचिर्द्धादिचर्चितां भूतशुद्ध्यादिकांपूजोसमाप्यतत्र पूजयेत् गणेशसूर्य
विष्णवीशदुर्गाश्चावाह्यमंत्रवित् पंचवाद्यैथतांक्षिप्त्वाहौंमंत्रेणाचमंत्रवित् तस्माद्धृत्थाप्यतांमालांस्वर्णपात्रे
निधायच पयोदधिघृतक्षौद्रशर्कराद्यैरनुक्रमात् स्नापयेत्पंचामृतविधिंपुधः क्रमात्तत्रैवसं
स्थाप्यस्थापयेत्शीतलेजले ततश्चंदनसौगंधिकस्तूरीचंदनादिभिः तांसमालिख्यह्रौंमंत्रमष्टोत्तरशतंजपे
त् तस्मात्नवग्रहांश्चापिदिक्पालांश्चपूजयेत् ततःसंपूज्यचगुरुंगरुत्तोयांमालिकांशुभां भैरवीतंत्रे आ
दौगणपतिंदेवंस्कंदंविष्णुमुमापतिं दुर्गांचपूजयेद्विद्वान्मालायांसुसमाहितः पंचगव्येक्षिपेन्मालांप्रासादे
नाभिमंत्रितां प्रासादेनअत्रैववक्ष्यमाणाप्रासादपरामंत्रेणाततस्तूत्पतांमालांस्थापयेद्धेमपात्रके पंचामृ
तेनसंस्नाप्यशीतलेनजलेनच चंदनेनसुगंधेनकस्तूरिकुंकुमादिभिः अभिषेकंततःकृत्वामंत्रेणानेनमंत्र
वित् प्राणाजीवसमारूढंमोंकारस्वरभूषितं विंदुनादसमायुक्तंमंत्रराजप्रविन्यसेत् नवग्रहान्पूजयित्वा
ततोदिक्पालपूजनं तिलेनघृतयुक्तेनशक्तितोहोमयेत्ततः स्वर्णेनदक्षिणांस्याद्विप्राणांसुसंतोषयेत्

रामः
८

दक्षिणामाचार्याय अनेनप्रासादेनविन्यसेअशेषान्नरशतंजपेदित्यर्थः प्राणोहंकारःजीवःसकारः स्वरणीपात्राभावे व्यत्यपत्रंवाग्राह्यं उक्तयोगिनीतंत्रवचनात् प्रकारांतरमुक्तिकांतंत्रे कल्पितंपूजयेदादौवस्त्रगंधानुलेपनैः स रुद्रःकारयेन्मालांविभुक्तास्वर्णरूपिणीं यथायोग्यंवेदवतीमालांकुर्यादिचक्षराः वर्णमानेनसाकार्यापंचग व्यमक्षिपेत् वर्णमानेनमात्रकावर्णमानेनसंख्ययेत्यर्थः एतेनज्ञानसंख्यैरप्यक्षैर्मालाकार्येतिज्ञाप्यते सूत्रं वापिचतुर्थैर्हिभालयेदस्त्रमंत्रकैः समानवर्णसूत्रेणपृथग्ग्रंथयाकृता सुवर्णादिगुणैर्वापियथायेत्साध कोत्तमः ब्रह्मग्रंथितंतोदयान्नागपाशमथापिवा कवचेनाववध्नीयान्मालांध्यानपरायणः सर्वशेषंततोमेरु सूत्रग्रथसमन्वितं ग्रथयेत्तारयोगेनवध्नीयात्साधकोत्तमः स्वंनिष्पाद्यदेवेशिजपेत्तोंचसमाचरेत् स्थंडि लेमंडलंकृत्वा यथाभागविधिक्रमात् मंडलस्थेष्टदेवस्यपूजाचक्रं पूजयित्वायथान्यायमिष्टदेवमनुक्रमा त् मासपूर्वंजपेन्मंत्रमशेषान्तरसहस्रकं जुहुयाद्दशांशेनयस्यदेवस्ययत्रियं यत्रियमित्यनेनपरश्वरणां गहोमेयद्ध्यंयस्यदेवस्योक्तंतेनहोमयेदित्युक्तं ततोमंडलमध्येतुतोमालांस्थापयेद्बुधः अस्त्रमंत्रंततोन्यस्य मूलमंत्रंततोन्यसेत् अंगानितानिविन्यस्यदेववन्यरिचिंतयेत् अभेदरूपमासाद्यमालाकार्यातदात्मिका ततोबलिंयथान्यायंदद्यान्नैःसाधकोत्तमः स्वंजपेन्मासमालायामिष्टदेवतां आचार्यपूजयेन्मंत्री शि

त्पिनंचयथाविधि नान्यमंत्रजपेन्नचयंदद्येच्छिवमात्मनः अस्त्रादिमंत्रजप्तव्यमंत्रस्यग्राह्यः वलिंमालाया
नैःहोमडव्यैः तथाउत्तरतंत्रे दृढसूत्रंनिमुंजीतजपत्रुद्यंतिमोयथा जीर्णेसूत्रेपुनःसूत्रंग्रथयित्वाशतंजपेत्
श्रोयागमे यदासंदृश्यतेमालभ्यथयित्वाथपूर्ववत् प्रतिष्ठितायोतस्यांतुमंत्रेजप्यादनन्यधीः अत्रपुरश्चरणाजपः
करेणाकर्त्तव्यइतिकेचित् तत्रप्रमाणंचिंत्यं वस्तुतस्तुपुरश्चरणेपिजपमालाभावेकरेणैवजपगणनाकार्यो उक्तं
चनारदपंचरात्रे अथांगुलिभिरेवापिजपकर्मसमाचरेदिति प्रपंचसारेपि पद्मासनःप्राग्वदनोपलापीतन्मान
सजपस्तर्जनीवर्जितामिः अक्षस्त्रजावांगुलिभिर्जपेत्मानिकुनंनामिविलंवितंचेति मंत्रतंत्रप्रकाशेपि जपस्यगणा
नांकर्यीस्थवांगुलिपर्वभिरिति तत्प्रकारमाह भैरवीतंत्रेपि अंनामामध्यमारभ्यकनिष्ठानुक्रमेणातु मध्यमा
मूलपर्यंताकरमालाप्रकीर्त्तितेति गोतमोप्याह कनिष्ठानामिकांगुष्ठमध्यमाभिर्जपेत्सदेति तदानामामध्य
मूलकनिष्ठामूलमध्याग्रानांमाग्रमध्यमूलपर्यंतमिति नवसुपर्वसुगणानायांकृतायांनववारंमंत्रजपोभवति
एवंदशावारंपुनःपुनरावर्त्तनेनाशेत्तरशतंजपोभवति द्वादशोत्तरशताद्वृत्वाशेत्तरसहस्रंजपोभवतीत्थ रामः
मन्यत्रापिष्वप्येवंवस्तुतस्तुतंत्रांतरदर्शनान्नर्जनीसंहितांगुलिभिरेवजपःकार्यः यदुक्तं कुलमूलावतारे अ ९
थवक्ष्येमहेशानिजपस्यगणनाफलं अंगुलीजपसंख्यायांफलमेकगुणंस्मृतं रेखयाद्विगुणंविद्याप्रजपी

वेदशाधिकं शतंस्याच्छंखमणिभिःप्रवालैरुक्तसहस्रकं स्फाटिकैर्दशसाहस्रंमौक्तिकैर्लक्षमुच्यते पद्माक्षैर्दशलक्षंतुसौवर्णकोटिरुच्यते ऊर्णायंथ्याचरुद्राक्षैरनंतगुणितंभवेत् श्वेतपद्माक्षमालाभिर्जपेत्सर्वमितंफलं अंगुलिभिर्जपंकुर्वन्सार्द्धांगुलिभिरर्द्धजपेत् अंगुष्ठेनविनाजप्तंविफलंभवतिप्रिये पर्वभिर्वांगुलीनांतुजपेदनुदिनंप्रिये मध्यमानामिकापर्वमध्यद्वयमिहप्रिये मेरुंसकल्पनंकुर्वन्प्रदक्षिणामनुक्रमात् अनामामूलपूर्वादि कनिष्ठानुक्रमेणातु तर्जन्यग्रादिनोदेविमध्यामूलावसानकं गणयेच्चक्रमेणैवकिंचित्संक्षोभ्यतेनलं अंगुलानावलंजीतजपकालेमहेश्वरी अंगुलीनांवियोगेनछिद्रेणश्रवणोजपः हस्तेत्यंगणनांदेविमत्रजंप्रजपेत्क्वचित् यतस्तज्जपमीशानीवलाद्हंतिराक्षसाः अथवामध्यमामध्यमूलपर्वद्वयंप्रिये मेरुंकृत्वाजपेद्देवी तर्जनीमूलकावधि अनामामध्यपर्वांतिशरक्षिरपक्रमेणावै इति अत्रांगुलिजपेरेखाजपसर्वजपश्चेतिद्विविधकरमालाजपः तत्रकनिष्ठाद्यंगुष्ठपर्यंतंपुनःपुनर्गणनांगुलिजपः कनिष्ठाद्यंगुलिगतरेखाभिर्जपेरेखाजपः पर्वजपस्तूक्तलक्षणएवेति अथविहितानि तत्रनारदः मनःसंहरणंशौचंमौनंमंत्रार्थचिंतनं अव्यग्रत्वमनिर्वेदो जपसंपत्तिहेतवः त्रैलोक्यसंमोहनतंत्रे लोभमात्सर्यसहितःकामक्रोधविवर्जितः सर्वथालक्षतेसिद्धिमन्यथा निःफलंभवेत् ऊर्ध्वसंभवः नित्यंनैमित्तंयत्कुर्वीतवाऽभ्रमोदिनं तत्रैवकर्मकुर्वीतनन्यमनास्तत्परायणः शांतश्चि

षणावस्थायीमौनीसंमानितांतरः यतेनंवेश्मवंकर्मास्थिरवीर्नियनेन्द्रियः गौतमः स्वकर्मणिरतिर्यस्यदितिसत्येन
संज्ञायः इनरस्यस्वधर्मरहितस्य दूरतोपिचिरकालतोपि मंत्राणांवे भूड्याव्रह्मचारित्वंमौनंचार्याजसूयता
नित्यंत्रिषवणांस्नानंभूडकर्मविवर्जितं नित्यपूजानित्यदानंदेवतास्तुतिकीर्त्तनं नैमित्तिकार्चनंचैवविश्वासोगु
रुदेवयोः जपनिष्ठाहादशैतेधर्मासुमंत्रसिद्धिदा ब्रह्मचर्यंअष्टविधमैथुननिवृत्तिः तउक्तंदक्षेण स्मरणंकी
र्त्तनंकेलिःप्रेक्षणंगुह्यभाषणं संकल्पोध्यवसायश्चक्रियानिष्पत्तिरेवच एतन्मैथुनमष्टांगंप्रवदंतिमनीषिणाः
विपरीतंब्रह्मचर्यमेतदेवाष्टलक्षणं अभिलाषपूर्वकंस्मरणाकीर्त्तनंप्रेक्षणानिनिषिद्धानि केलिःपरिहासादि
वाक्यचेष्टा गुह्यभाषणासंभोगार्थंरहोमंत्रणं संकल्पःमानसंकर्म अध्यवसायहंभोगनिश्चयः त्रिषवणास्ना
नंतुशक्तपरं स्नानंत्रिषवणोपोक्तमसक्तादिसक्तुरेदितिवैशंपायनवचनात् भूड्कर्मतुदंभहेतोर्नथोत्साद
उच्चाटोभ्रममारणः व्याधिश्चेतिस्मृतंक्रूडमितिनारायणीयोक्तं नित्यपूजातत्पूर्वकंमंत्रजपविधानात् नैमि
त्तिकंअपरादौविशेषपूजा यउक्तंमंत्रतंत्रे अशेत्तरमहस्तंतुरूत्वातर्यागमादरात् जपेत्सतिदिनंयत्तुनित्यस्य
जपस्मृतः अयनेविषुवेचैवग्रहणेचंडसूर्ययोः द्वादश्यांपौर्णमास्यांतुतेषुनैमित्तिकोजप नित्यत्रिगुणितःसोथ
पूजाचैवहरेर्नथेति कपिलापंचरात्रे मंत्रश्चदेवतातारातिथिवारेषुजप्यतंइति तथागौतमः ततोगुरोःपादपद्मं

पुष्पांजलिभिरर्चयेत् तस्मादासीसराग्राह्यानतः संतोषमाचरेत् संतुष्टेनगुरौदेवःसंतुष्टेनान्यथाभवेत् तथाश्री
भगवद्वाक्यं संतुष्टोहिगुरुर्यस्यतस्यतुष्टंजगत्त्रयं नास्त्यसाध्यंजगत्त्रयसुप्रसन्नेगुरौसुते हृदिन्यसेद्गुरोर्वाक्यंनकदा
चिद्विकल्पयेत् क्रमसंभवः स्नायात्रुपंचगव्येनकेवलामलकेनच श्रुतिस्मृतिपुराणोक्तमंत्रैस्नायादनंतरं अनुलि
प्तदृष्टेयंशुचिव्रतमनोनिशं उपंचसारे अथानुलिप्यप्राचीनक्राचीवाजपेन्मंत्रमिति वाराहःसमुच्चये फेत्का
रिणीतंत्रे भैक्षादिनियमाहारःसक्रुद्भोजौविधीयते रम्भामूलफलैर्वापिकुर्याद्दानमन्वहमिति त्रैलोक्यसंमोहन
तंत्रे गुरुगोविप्रवालेषुदीनोधक्रूपरोषुच भवेदार्यमतिर्मंत्रीनचडोहंसमाचरेत् पश्चाद्भोज्यसमभ्यर्च्यपासं
स्यान्नशोभनं गौतम गोषुभक्तिःसदाकार्यागोषुसुक्रूपरांतथा नित्यगोषुप्रसन्नासुगोपालोपिप्रमोदति
अर्थानपिद्धानितत्रत्रैलोक्यसंमोहनतंत्रे नाप्रियंकस्यविद्यायानान्तंवाकदाचन नछयामाक्रमेहिद्वाविभी
तककरंजयोः नक्रुर्यात्कस्यचित्किंचिन्नरःस्त्रीयाज्जपांतरे तैलाभ्यंगंनकुर्वीतमधुमांसंविवर्जयेत् स्त्रीषुसंभा
षणंनैवकुर्यादेविविमोहितः ननग्नोनसुगंधस्त्रग्योगीतवाद्यंविसर्जयेत् नरःस्त्रीयादिति स्मृतिसंभवे असंभवेतु
तोहेनभस्मरागमाचंद्रार्कंवस्त्रमाचरेत् इतिके विमोहितःकामपरवशःप्रयोगसारे विभीतकार्कंकारंजक्रुहिछायानसं
श्रयेत् क्रमसंभवः वाग्यतःकर्मभिर्नित्यंनिस्त्रीवनिनादिषु स्त्रीभूद्रपतितज्ञानन्नास्तिकोहिरुषाषणं अस

त्यभाषणंजेत्सभाषणोपरिवर्जयेत् सभ्यैरपिनभाषेतजपहोमार्चनादिषु वर्जयेद्दीनवाग्यादिश्रवणोत्सर्दृनं
तांशूलगंधलेपंचपुष्पधारणमेवच मैथुनंतत्कथालापंतन्नोक्षिंपरिवर्जयेत् असत्प्रलापणमनर्थवर्जयेदन्यपूज
नं कौटिल्यंक्षौरमभ्यंगमनिवेदितभोजनं असंकल्पितकृत्यंचवर्जयेन्मर्दनादिकं त्यजेदुद्दर्तनस्नानंसुगंधा
मलकादिकं रम्यैरिति तत्रप्रायश्चित्तमाह नारदः सकृदुच्चरितेह्येतत्प्रणवंसमुदीरयेत् ओंनमःशिवायेतिपञ्चा
यांसकृच्चरेत् वऊप्रलापेचावश्यंनस्यांगानितत्रोजपेत् क्षुतेचैवतथास्पृश्यस्थानांस्पर्शनेतथेति योगियाज्ञ
वल्क्यः यदिवाग्यमलोपःस्याज्जपादिकथनंतव व्याहरेद्वैष्णवंमंत्रंस्मरेद्वाविष्णुमव्ययं वायवीयसंहिताया पीत
नामंत्यजानांदर्शनेभाषितेक्षुते क्षुतेधोवायुगमनेजृंभणेजपमुत्सृजेत् प्राज्ञावाचम्यवैतेषांप्राणायामंषडं
गकं कृत्वासम्यग्जपेच्छेषंयद्वासूर्यादिदर्शनं मार्जारंकुक्कुटंकौंचश्वानंगृध्रखरंकपिं दृष्ट्वाचम्याचरेत्कर्मस्पृश्य
स्नानंसमाचरेत् स्वमादौश्वनियमात्पुरश्चरणाद्भ्रश्चरेत् इतियथाशिववचनं क्रोधक्षुतमरंत्रोणिनिष्ठीव
नविजृंभणो दर्शनंत्वस्पनीचानांवर्जयेज्जपकर्मणि आचांतःसंभवेतेषांस्मरेद्वामोत्वयासह ज्योतीषिवपपूरेप
द्वाक्रमीद्वाप्राणसंमयं मांमहेशांत्वयापार्वत्या लिंगपुराणे सूर्योग्निश्चंद्रमाचैवग्रहनक्षत्रतारकाः एतेज्योती
षिचोक्तानिविद्वद्भिःब्राह्मणोस्तथेति यथा क्रोधोमदःसुधानंद्यानिष्ठीवनविजृंभणो स्वनीचदर्शनंनिद्राप्रलापा

सेजपद्धिवः तथाविष्णुधर्मोत्तरे उपविश्योजपस्नानःकृतन्यासबलनादिषु पूजायांस्नानहोमस्यसन्नवारान्प्र
कीर्त्तयेत् फेत्कारिणीतंत्रे यपकालेयदापश्येदशुचिर्मंत्रवित्तमः प्राणायामंततःकृत्वानमःशेषंसमापयेत्
यदाचैवंभवेन्मंत्रीस्वयमथशुचिःपुनः स्नात्वाचम्ययथापूर्वन्यासंकृत्वापुनर्जपेत् इतिन्यासंअधिकारसंपा
दकं एतेनमूत्रोत्सर्गादावशुचित्वसंभवश्चेत्स्नानंअन्यथाप्राणायामषडंगन्यासान्कृत्वाशेषंसमापयेदिति
प्रतोषने वैशंपायनः अस्मातस्यफलेनास्तिनथातर्पयनःपितॄन् स्नाप्यतर्पयतादेवान्नास्तत्यमभिजल्पनः
नैकवासाजपेन्मंत्रंवस्त्रवस्त्राऽलोपिवा योगिनीतंत्रे अनास्थाविघ्नमन्त्रेतमभ्रान्तजपकर्मणि आलस्य
भावनाशङ्किःसिद्धिनाशायनिश्चितं न्यूनेऽतिरिक्तप्रवारंचपरिवारंचवर्जयेत् न्यूनेऽर्जनसंस्पर्शोमशकादिभि
र्नत्यजेत् वायवीयसंहितायां उत्सर्गीकंचुकीनग्नोमुक्तकेशोगलाद्यृतः अपवित्रकरोभुक्तःप्रलपन्नजप
न्क्वचित् अमंत्रतोकरोत्कृत्वाशिरसिप्राश्नतेपिवा चिंतायाऽलचित्तोवाऽक्षौर्णांतःसुधान्वितः अनाशनः
संयतोवागरुन्नुष्ठितस्ववा रथमायामशिवस्थानेनजपेन्निमित्तेनैरंतरे उपानद्गूढपादोवायानस्थागतस्त
था प्रसार्यनजपेत्पादावुत्कटासनस्ववा कपिलपंचरात्रे वीरासेपादथवालस्याजपहोमार्चनोत्तरा उन्निद्र
नितन्यासंषडंगंविन्यसेत्पुनः अपवित्रकरःपवित्रकरो अस्त्रोऽस्त्रंऽऽथोदर्भःपवित्रमितिहिकोशः विनाद

शि-चं १२

भेणायत्कर्मविनासूत्रेणावापुनः पक्षसंतत्वेत्सर्वेनेहामत्रफलंफले इतिकूर्मपुराणवचनात् तस्यावश्यकत्वा
भिधानात् सूत्रंयज्ञोपवीतं विस्मृतेपि स्नातःसुप्रक्षालितःपरिणीपादः शुचिर्दक्षशिखेदर्भपाणिराचांतः प्राङ्मुखोद
ङ्मुखोवोपविशेत्सोनोधानीदेवतापूजयेदिति तत्रवामेवक्रुशाःदक्षिणेपवित्रं तथासंध्योपक्रमे
कात्यायनः सव्येपाणौकुशान्कृत्वाकुर्यादाचमनक्रियां कृत्वाप्रचरणीयास्यकुशादीर्घश्चवर्हिषः दर्भाःपवि
त्रमित्युक्तमतःसंध्यादिकर्मसु सव्यःसोमग्रहःकार्यादक्षिणासपवित्रकाः सव्येवामे मनुकोहशाधार्याःदक्षि
णोधार्यानवेत्पतआदक्रुत्वाःपवराः पंचयज्ञादिप्रवरार्थाःदीर्घोवर्हिःसंज्ञकाःस्तरःउविस्तरणार्थः प्रचारा
ग्नेषुसंध्यादिषुदर्भाविहवस्यधार्याः विशेषरहिताःकर्मसुभूरिसाधनंनत्वेकःकुशोपादृश्यति कुशहस्तः
समाहितइति अभ्यन्तुकरंकुर्यात्सुवर्णरजतैःकुशैरितिचपारस्कारगोभिलादिभिरपुक्तं अतोविशेषाभावा
त्संध्यादिषुसव्यःकुशमुष्टिरक्षिणाः अनंतर्गर्भिनेसाग्रंकोशंदिलमेववा प्रादेशमात्रंविज्ञेयंपवित्रंयत्रक्व
चिदिति चोक्तलक्षणापवित्रमुक्तः अंतर्गर्भिन्नेगर्भवतीचविहायत्रतुर्थ्यांतं लघुसारीतःजपेहोमेतथा
दानेस्वाध्यायेपित्रतर्पणे अभ्यन्तुकरंकुर्यात्सुवर्णरजतैःकुशैरिति स्वर्णधारणंतुदक्षिणानामिकायां ज
नामिकायांतत्सार्यं दक्षिणाम्यकरस्यचेति हेमधारणाप्रकरणस्थदेवीप्रराणवचनात् रजतंतुतर्जन्यांधार्यं तत्रो

रामः १२

पविश्पतेकर्मकर्त्तुरंगंनसूच्यते दक्षिणास्तत्र विज्ञेयः कर्मणोपारगैः करश्तिकात्यायनवचनात्तर्जनीमूलस्थपवित्रीर्थ
त्विनतदेवरजधारणंतत्रैवन्यायमित्येतन्मूलमहाजनाचारेणानिरणीतप्रमाणपातर्जन्यांरजनधार्यमितिस्थनिस
र्जयलिखितवचनाच्च सव्यापसव्यवलितेनवल्ग्यंथिसमन्वितं लंघयेत्सर्वमाद्यंतु द्वितीयंनैवलंघयेदितिशंख
वचनाच्च सुवर्णारजतैरितिवऊवचनंवऊधारणात्मकर्मांगनत्वव्यनक्ति नच्चदधित्ववत्सुवर्णत्वरजतत्वजात्यो
र्द्धारणकारंभइत्तेरेकसाधारणेप्युपपद्यतइति वामनपरारेण उदकेनविनापूजाविनाऽग्नेर्याक्रिया आ
ज्येनत्वविनाहोमःफलंदास्यंतितेवले स्मत्तर्थसारे कुशाःकाशायवाइर्वीउशीराश्वसकंदराः गोभूमाव्रीह
योभंजादशदर्भासवल्वजाः नभोमासस्यदर्शेतुशुचिर्दर्भान्समाहरेत् अपातयामास्तेदर्भाविनियोज्याः
पुनःपुनः विरिंचिनासहोत्पन्नपरमेष्ठीनिसर्गजा नुरसर्वेणापापानिदर्भास्वस्तिकरोभव इमंमंत्रंसमुच्चा
र्यतनःपूर्वोत्तरानुखः फट्कारेणामंत्रेणासकृछित्वासमुद्धरेत् अछिन्नाग्राअशुक्लाग्राश्चेतुहरिताःशु
भाः अमूलादेवकार्येषुप्रयोज्याश्चजपादिषु सप्तपत्राःकुशाःशस्तादेवेपित्र्येचकर्मणि अनंतस्तरुणोमा
ग्रोप्रादेशेतुपवित्रके चतुर्भिर्दर्भपिंजूलैर्ब्राह्मणास्पवित्रकं एकैकंपर्यसूत्रंवर्णावर्णेयथाक्रमं सर्वेषां
भावयेत्तांपवित्रंग्रथितंतथा त्रिभिस्तुशांतिकेकार्येपौष्टिकेपंचभिस्तथा चतुर्भिश्चाभिचारेसप्तभि

काशैश्चकेवन सपवित्रःसदर्भोवाकर्मणिचमनंचरेत् नोच्छिष्टेनभवेन्नस्पृक्तोच्छिष्टंतुवर्जयेत् यैःकृतःपिंडनि
र्वापःश्राद्धंवापितृतर्पणं विण्मूत्रादिषुयेदर्भातेत्यागोविधीयते निवीमध्यस्थितास्त्याज्यायक्षभ्रूमोस्थितास्तथा
वामहस्तेस्थितेदर्भेनपिवेद्दक्षिणेनतु वस्त्रादिनोपग्रहणेनदोषःपिवतोभवेत् नब्रह्मग्रंथिनावामेनदुर्वाभिःक
दाचन स्नानेहोमेजपेदानेस्वाध्यायेपितृकर्मणि सपवित्रोसदर्भोवाकरोकुर्वतिनान्यथा कुशाभावेपिकास्तुःका
शाकुशसमास्मृताः काशाभावेगृहीतव्याश्चान्येदर्भामधोचिताः नाडीलुनीयाद्दात्रौवालुनीयान्नसंशयोः दर्भा
भावेस्वर्णरौप्यताम्रत्रैक्रियाश्चरेत् इत्यास्तांविस्तरः नारदपंचरात्रे अपवित्रकरोलग्नःशिरसिप्राहृतोपिवा ग्रल
यज्ञजप्येष्वावन्नावन्निष्फलमुच्यते नग्नमाहात्रिः नग्नोमलीनवस्त्रेःस्यानग्नश्चार्द्रपटस्मृतः नग्नोद्विपुराणवस्त्र
स्यान्नग्नोरक्तपटस्तथा नग्नश्चस्यूतवस्त्रःस्यान्नग्नस्तिग्धपटस्तथा द्विकच्छोनुत्तरीयश्चनग्नश्चावस्त्रपंचव भवि
ष्यपुराणे द्विकच्छःकच्छशेषश्चवहिकच्छस्तथैवव एककच्छःकच्छश्न्योनग्नपंचविधःस्मृतः देवलः वल्कवासाभ
वेन्नग्नोनग्नःकौपीनवाससेति शाखायनः स्नानमाचमनंहोमंभोजनंदेवार्चनं प्रौढपादेनकुर्वीतस्वाध्यायंचैवत
र्पणं आसनारूढपादस्तुजानुनाजंघयोस्तथा कृत्वासमकस्थितोयस्तुप्रौढपादसउच्यते मंत्रतंत्रप्रकाशेतु उक्त
नियमानभिधायशंकावेवंसर्वमेतदशंकः यथाशक्तिजपेदित्यंकं सुंदराचार्यशिष्येणश्रीनिवासेनधीमता चंद्रि

कामांप्रणीतायांप्रकाशोद्वादशोगमत् इतिश्रीसुंदराचार्यचरणारविंदध्यानेवासिनाश्रीनिवासभट्टविर
चितायांश्रीशिवार्चनचंद्रिकायांद्वादशःप्रकाशः १ अथजपः तत्रऊंभसंभवः गुरोर्लब्धस्यमंत्रस्यशश्वद्वा
वर्त्तनंहियत् अंतरंगाक्षराणांचन्यासपूर्वंजपःस्मृतः अंगेनिमुतीक्षासंबोधनं अक्षराणामंतराचर्त्तनंजपइतिसं
बंधः तज्जेबानाहुवायवीयसंहितायां जजःस्याद्क्षरक्षुन्निःसउच्चोपांशुमानसः यउच्चनीचस्वरितैःशब्दैःस्पष्ट
क्षरैः मंत्रउच्चारयेद्वाचाजपयज्ञःसवाचिकः शनैरुच्चारयेन्मंत्रमीषदोष्ठौचचालयेत् किंचिच्छ्रवणायोर्यः
स्याउपांशुसजपःस्मृतः जिह्वाजपःसविज्ञेयःकेवलंजिह्वयाजपः धियायदक्षरःश्रेणीवर्णस्वरपदात्मिकां उच्चरे
दर्थसंस्मृत्यासउक्तोमानसोजपः उच्चैर्जपोविशिष्टःस्याद्यज्ञादेर्द्दशभिर्गुणैः उपांशुस्याच्छतगुणःसहस्रोमानसो
स्मृतः नारदपंच वाचिकंसर्वकार्येषुउपांशुःसर्वसिद्धिषु मानसंमोक्षमार्गेषुध्यायेद्देवंचसर्वदः महाभारते सर्वे
षामेवक्षयानांजपयज्ञःप्रशस्यते अहिंसयाहिभूतानांजप्यतेसोमहाफलः जपनिष्ठोद्विजःश्रेष्ठःसर्वयज्ञफलंभवे
त् श्रीभगवद्वचनंच यज्ञानांजपयज्ञोस्मीति पद्मनाभीये यावंतःकर्मयज्ञास्युःप्रदीक्षानितपांसिच सर्वेतेजप
यस्यकलानार्हंतिषोडशीं जपेनदेवतानित्यंस्तूयमानाप्रसीदति प्रसन्नाविपुलान्भोगान्दद्यान्मुक्तिंचशा
श्वतीं भृगुसंहितायां येपाकयज्ञाश्चत्वारोविधियज्ञसमन्विताः सर्वेतेजपयज्ञस्यकलान्नार्हंतिषोडशीं

अथासनादिनत्रनारदः कृशाजिनांवरैर्युक्तंचतुरंगुलमूर्ध्वतः चतुरस्रंविहस्तंचसुदृढंस्निग्धनिर्मलं आसनंकल्पयि
त्वानुजपकर्मसमारभेत् वैशंपायनः सर्वसिद्धैर्ब्राह्मधर्मज्ञानसिद्धैमृगाजिनं वस्त्रासनेरोगहरंवैत्रजंश्रीवि
वर्धनं कौशेयंपौष्टिदंप्रोक्तंकंबलंदुःखमोचनं वस्त्रमाविकंवक्ष्यमाणब्रह्मयामलवचनेनकेवलवस्त्रानेदोषभ
वणात् वास्त्रेषुकंबलंश्रेष्ठंमासनंदेवतुष्टये इत्युत्तरतंत्रवचनाच्च भृगुः कामार्थंकंबलंचैवाभिचारंरक्तकंबलं
धर्मार्थकाममोक्षान्निश्चैलाजिनकौशोत्तरे ब्रह्मयामले कंबलःश्वेतरक्तोचविचित्रोनीलपीतको व्याघ्राजिनंच
कौरंगमन्येर्नानाविधासनैः अथनिषिद्धानि सारसंग्रहे वंशाश्मधरणीदारुतृणपल्लवनिर्मितं वर्जयेदासनं
मंत्रीदारिद्र्यव्याधिदुःखदं नादीक्षितोविधत्तानुकूलमारजिनंगृही विशेषनिर्वनस्थश्चब्रह्मचारीचस्नातकः ब्र
ह्मयामले तृणंपल्लवकाष्ठानिपाषाणंभृगमेवतथा वंशासनंवस्त्रंचकेवलंक्षितिमासनं एवमष्टविधंदेविचा
सनंपरिवर्जयेत् तृणासनेभवेद्रोगःपल्लवेचित्तविभ्रमः पाषाणेचतथोच्चाटेज्वरस्यान्मृन्मयासने क्षित्यासनेभवेत्
पीडापापविस्फोटदुःखदं वंशासनेदरिद्रःस्याद्दारुस्त्रेस्यान्निनाशनं चिंताचपल्लवेहानिरुच्चायेविविधोज्वरः शो
कंशूलादिकारोगान्मृत्युःस्याद्दारुकासने इत्थंचासनंदेविवर्जयेत्सर्वकर्मसु अथजपेपूर्ववदिनकृत्यम् तत्रत्रैलोक्य
संमोहनतंत्रे शुभेशुक्लेनक्षत्रेशुक्लेकालेयतव्रतः गुरोरनुज्ञासमासाद्यततःकर्मसमारभेत् सनत्कुमारः

अथवक्ष्यामिमंत्रस्यपुरश्चरणमुत्तमं कृताभिषेकोविधिवन्मंत्रंलब्धागुरोर्मुखात् शुभेमुहूर्त्तेनक्षत्रेतिथौस्नात्वा
यथाविधिः विप्रान्संतर्प्ययेत्तेनभाजनाच्छादनादिभिः शुचिनवस्त्रभूषाद्यैःसंतोष्यगुरुमात्मनः आरभेतन्नपंच
श्वासदनुज्ञोपरःसरं प्रथममंत्रै क्षेत्रपालाश्चसंपूज्यबलिंदद्याद्यथाविधि बलिमंत्रस्तु पूर्वमेहृदयंपश्चाद्विड्
बिःस्यात्पुरुहृदयं भंजयद्वितयंभूयोनमोयद्वितयंपुनः ततोविघ्नपदंदंदंमहाभैरवतत्परं क्षेत्रपालबलिंगृह्णगृह्ण
पावकसुंदरी बलिमंत्रोपमाख्यातःसर्वकामफलप्रदः तस्मैसपरिवारायबलिमेतंनचाहरेत् इति मंत्रप्रयोगे
वक्ष्यते तत्रश्चोपवासःकर्त्तव्यः अथजपारंभः तत्रमहाकपिलपंचरात्रे एतन्नक्षत्रतिथ्यादौकरणेयोगवास
रे मंत्रोपदेशोगुरुणासाधनंचशुभावहमितिप्रोक्तत्वात् दीक्षापुरश्चरणयोःसमाननक्षत्रादिकंज्ञेयं तत्रपुर
श्चरणविधिनाविचार्यसमीचीनंसमयंज्ञात्वासमारभेत् तउक्तंदक्षिणामूर्त्तिकल्पे साधयेत्स्ववरोद्दिश्यनरःपूर्वपक्षं
समाश्रितः पुण्येषुरुर्त्तेनक्षत्रेतिथौस्नात्वायथाविधि नत्वागुरुगणेशानंनत्वाडुर्गांचमातरः तथाकुंभसंभवा
नतःसंकल्पकुर्वीतपुरश्चरणमादरात् नारदीये संकल्पंतुबुधःकुर्यात्स्वस्तिवाचनपूर्वकं तथादेवलः अमुकाप्रा
तरारभ्यस्नात्वाचम्यसमाहितः सूर्यादिदेवताभ्यश्चनिवेद्यव्रतमाचरेत् प्रातर्व्रतंसमाचरेदितिसंबंधः व्रतंस्वकर्त्तव्य
विषयोनियमसंकल्प षडुक्तंकुंभसंभवेन कर्त्तव्यस्यसमस्तस्यनियमग्रहणंव्रतं नियमव्यतिरेकेणासर्वंभवति

शि. चं १५

निःफलं अभुक्ताप्रातराहारमित्येकवचनादर्थात्पूर्वदिनस्यैकभक्तंकार्यं अभ्योपवासाशक्त्यैकभक्तंशेषंसूर्यादिदेवताभ्यइति सोमःसूर्यइत्यादिनामन्त्रपुरश्चरणोक्तपर्यायेणनिवेद्येत्यर्थः तेश्लोकाःप्रयोगेवक्ष्यंतेमहाभारते गृहीत्वोदुम्बरंपात्रंवारिपूर्णमुखुरवे उपवासंतुगृह्णीयात्तथासंकल्पयेद्बुधः उदक्खुरइतिनियमग्रहणार्थं संकल्पयेन्मनसानियमेदिति तथागौतमः अंतर्पत्नुकरंकृत्वासलिलंसक्रशोदकं फलंसमभिसंधायेति तथाकुंभसंभवः निक्षामानामनेनैवसाक्षात्कारोभवेदिति साक्षात्कारःस्वेष्टदेवदर्शनं अनेनपरश्वरणेनेतिअत्रयद्यपिमनसासंकल्पयतिवाअनिलपतिकर्मणाचोपपादयति इतिहरिणास्मरणात् तस्माद्यत्पुरुषोमनसाधिगच्छतितद्वावदतितत्कर्मणाकरोतिइतिश्रुतेश्चमनसाधिगतस्यवाचाभिलाषेक्रियमाणेयेनरूपेणमनसाधिगच्छतितेनैववाचाप्यभिलापःकर्तव्यइतिप्राप्यते अतोमुक्तकामेनमयाइदंकर्तव्यमितिमूलविशेषोज्ञेयस्वयंप्रतीयते तथावासादिनामप्युद्देशःकर्तव्यः तथाब्रह्मांडपुराणे मासपक्षतिथीनांचनिमित्तानांचसर्वशः उद्देशेवनमक्रीर्णोनतत्फलवाग्भवेत् इति मासपक्षतिथीनांसर्वशःसर्वप्रकारेणसामान्यविशेषभावेनतत्रसामान्येनमासपक्षतिथिपदेनविशेषतःकार्त्तिकशुक्लप्रतिपदादिपदेनदृश्यतेच इत्येमासपक्षितेपक्षेइत्यादिमुनीनांप्रयोगनिमित्तानांदेशकालानांसर्वप्रकारेण तत्रसामान्येनभारतवर्षपदेनतत्कर्मफलहेतुत्वात् तथाचविष्णुपुराणे इतिसंप्राप्यतेस्वर्गमुक्तिमस्मात्प्रयांतिहि तिर्यक्त्वंनारक

रागः १५

त्पंचयात्पतःपरुषोमुनेः नरवल्लन्यत्रमर्त्यानांकर्मभूमिर्विधीयते इति विशेषेणकालस्यापिसामान्यतः अत्ये
त्यनेनविशेषतःसूर्योपरागादि --- नयैवमासादीनांनिमित्तत्वायमुद्देश्यत्वक्षयप्रसंगः संयोगपृथक्त्वन्यायेनसकृदुद्देश्यत्वस्ये
वोभयत्वात् उद्देश्यत्वनंनचप्रयोगमकुर्वतः फलाभावश्चाभिहितः अतएवगरुडपुराणेश्राद्धकरणे ॐअद्यामिनदे
शेअमुकमासेअमुकराशिगतेसवितरिअमुकपक्षेअमुकतिथावित्यादयुद्देश्यत्वः अग्निपुराणे अथसोमार्कग्रहणेसंक्रा
त्यादौसुतीर्थकरणे तथा मकरस्थेरवौमाघेस्नानं स्वमन्येद्युर्विवाकेपुश्रयते फलंचात्रनैमित्तिकिःसकामानांउक्त
वचनात् नवैहिकमैत्रसिद्धिकामइत्यभिलपनीयं उक्तनारदवचनेनोभयसिद्धेःपरश्चरणफलत्वाभिधानात्इति तथा
पूजात्रैकल्किकीनित्यंजपस्तर्पणमेवच होमोबलिरणश्चैवपरश्चरणमुच्यत ऊंभसंभवतवचनेनजपादीनामेवपुरणाङ्ग
त्वेनाभिधानाच्चपरश्चरणमहंकरिष्यइतिअभिलपनीयं नचपरश्चरणस्यचिरसमयसाध्यत्वेनाद्यामुकतिथौपुर
श्चरणंकरिष्यइत्यनुपपन्नेस्यादितिसांप्रतंकरिष्यइतिक्रियातोःकृतिमात्रार्थत्वात्क्रियायाःकृतिसामान्यान्वितत्वेनव
र्त्तमानतिथौपश्चात्कथापिदृत्पासंपादितयातत्तत्तिथौकृतेनिर्वादलोवपत्तिरिति अद्यारभ्यकरिष्यइतिवा अतःपरमशौचे
पिनजपवाधः नउक्तंविष्णुना यज्ञव्रतविवाहेषुश्राद्धेहोमार्चनेजपे आरब्धेसूतकंनास्तादनारंभेचसूतके प्रारंभोवरणं
यज्ञेसंकल्पोदानजापयोः नांदीमुखंविवाहादौश्राद्धेपाकपरिक्रियेति वस्तुतस्तुनाग्निकदीक्षावतारमशौचादिसंभवेपि

शि. चं
१६

नित्यार्चनवाधोनास्ति जपोदीक्षार्चनविधिःकार्योदीक्षान्वितैर्नरैः नास्तिपापंयतस्तेषांसूतकंवायतान्ननाशिनिदेवी
यामलवचनात् सूतकेमृतकेचैवऋमोद्धारादिकेतथा जप्यंचार्घंतथाकुर्यान्मंत्रन्यासपुरस्सरमिति सूडानीतंत्रव
चनात् शिवविष्वर्चनदीक्षायस्यचाग्निपरिग्रहः ब्रह्मचारियतीनांचशरीरेनास्तिसूतकमितिविश्वयामलवचनात्
सूतकेमृतकेचैवनित्यंविप्रमयस्यच स्नानेनास्यविप्रेन्द्रसद्यःशुद्धिःप्रजायते इतिनारदपंचरात्रवचनात् उपासने
तुविप्राणामंगशुद्धिःप्रजायत इतिपराशरवचनाच्च अत्रविप्राणामितरेषांक्षत्रियादिनामधिकारोनास्तीतिप्रतीयते
ब्रह्मणास्यैवपूज्योहंशुचेरप्यशुचेरपि स्त्रीशूद्रस्यापिसंस्पर्शेवज्रपातान्मुहुःसह इतिविश्ववचनात् विप्रस्यतुसदैवाहंशु
चेरप्यशुचेरपि पूजांगृह्णामिशूद्रस्यप्रक्षात्स्वाचारवर्त्तिनइतिशिववचनात् नचैवामुष्यभुंजीनशिवलिंगेमहेश्वरं
सूतकेमृतकेचैवनत्याज्यंशिवपूजनमिति लिंगपुराणवचनाच्चेति शूद्रस्येतूपलक्षणंविप्रस्येतरत्वादिति एतत्तांत्रि
कपूजायांमेवपंचयज्ञादौतुनाधिकारः अग्निहोत्रादिकर्मार्थंशुद्धिस्तत्कालिकेस्मृता पंचयज्ञान्नकुर्वीतस्वशुद्धिःपुनरेव
च स्मृतिगौतमवचनात् आदिपदेनतांत्रिकपूजाग्रहणे तात्कालिकोयावतातत्कर्मसिध्यति नैमित्तिककाम्यपूजा

रामः
१६

यांतुतांत्रिकानामपिनाकारः सूतकेमृतकेचैववर्त्तमानेतुनारद कामतःपूजितेमंत्रेशांतिकादौचकुत्रचित् जपेत्तद
शतंमंत्रीसिंहमंत्रस्यभक्तितः शतत्रयमकामात्तुप्रायश्चित्तविधौजपेदितिनारदपंचरात्रवचनात् अकामान्नैमित्तिका

दीक्षकुत्रचित् जपेत्पंचशतंमंत्रीसिंहमंत्रस्यभक्तितः शतत्रयमकामाच्चप्राप्यश्चित्तविधौजपेदिति नारदपंचरात्रवचनात् अकामानैमित्तिकार्च्चने वायवीयसंहितायां स्वमुक्तविधानेनविच्छेत्वरितंविना उक्तसंख्यंजपंकुर्यात्पुरश्चरणमिष्यते देवतागुरुमंत्राणामेकांसंभावयन्धिया जपेदेकगनाःप्रातकालान्मध्यंदिनावधि यत्संख्यातजास्त्रुतत्कुर्यादिनेहि ने यदिन्यूनाधिकंकुर्याद्व्रतभ्रशोभवेन्नरः अत्रदिवाचैवजपंकुर्यान्पोरश्चरणिकोविधिः इतिफेत्कारिणीतंत्रेरात्रिवाप दाभिधान् जपंरात्रौविवर्ज्ज्येदितिकुंभसंभववचनेनरजनीजपनिषेधाच्च दशकालाऽपवादसंभवनायंचतुर्थमुहूर्त्तपर्यंतमपिजन्नयं पंचमुहूर्त्तस्परात्रसीनामसावलासागर्हितासर्वकर्मसु इतिमत्स्यपुराणनिंदितत्वात्इति अत्रमुहूर्त्तशब्देनभागउच्यतेदिवसस्यपंचमोभागोनिषिद्धइत्यर्थः तथापिंगलामते नाध्यातोनार्चितोमंत्रेसुसिद्धोपिप्रजापतिः नाजप्तःसिद्धिदानेकुर्नाकृतःफलदोभवेत् पूजाध्यानंजपंहोमंतत्साकर्मचतुष्टयन् पत्यहंसाधकःकुर्यात्स्वयंचेत्सिद्धिमिच्छति जपःश्रांतःशिवंध्यायेत्ध्यानश्रांतपुनर्जपेत् जपध्यानसमायुक्तःशीघ्रंसिद्धतिमंत्रवित् नास्तःसंख्यापरैर्नियमैर्व्यर्जपसंख्यारणंशनः यथोक्तकंडेजुह्वायथाविधिसमाहितः अथावाप्रत्यहंजप्त्वाजुह्वामानदशांशनः वैशंपायनः नैरंतर्यविधिप्रोक्तोनदिभंवतिलंघयेत् दिवसातिक्रमात्सोमंत्रसिद्धिर्भवेन्नहि यावत्संख्यंजपेदहिपूर्वसिद्धावदेवतु दिनांतरेपिप्रजपेदन्यथासिद्धिरोधकृत् गौतमः ध्यानार्चनजपानांचप्राणायामारब्ध

शि-चं १७

यस्तस्य आद्यंतयोर्विधीयतेनाशिकाष्ठचारिणः उत्तरतंत्रे जपादौपूजयेन्मालांनोयेरभ्युक्षयत्ततः निधायमंडल स्यांतःसव्यहस्तगतांचवा इष्टमंत्रेणमालायाःप्रोक्ष्यणंपरिकीर्तितं ॐमांमालेमहामायेसर्वशक्तिस्वरूपिणी चतु र्वर्गस्त्वयिन्यस्तस्तोसिद्धिंयच्छ पूजयित्वाततोमालांगृह्णीयादक्षिणेकरे वीजंगरणपतेपूर्वमुच्चार्यतदनंतरं अ विघ्नंकुरुमालेवंगृह्णीयादित्यनेनच मंडलस्योर्तानिधायवामहस्तगतांभुक्ष्यत्पूजयेदितिसंबंधः तथा जपंसमा रभेत्पश्चात्पूर्ववध्यानमाश्रितः हस्तेनस्वजपारामंचिंतयन्मनसाशिवं चिंतयित्वागुरुंमूर्धिन्यथावर्णादिकंभवेत् मंत्रंचकंठतोध्यात्वापीनवर्णंहिरण्मयं महामायांचहृदयेआत्मानंगुरुपादयोः आज्ञाचक्रेततःपश्चात्गुरोर्मंत्रत्य चात्मनः देवाभ्यांपेक्तांनीत्वासुषुम्णावर्त्मनाततः तत्वस्वरूपनेकंतंयचक्रंप्रतिलंघयेत् यद्यचक्रेपिमहामाया शरणंध्यात्वाप्रयत्नतः लंघयेन्मूलमंत्रेणाचादियोडशचक्रवं आदियोडशचक्रस्यासाधकानंदशायिनीं चिंतयत् साधकोदेवीजपकर्मसमारभेत भ्रुवोरुपरिनाडिनांत्रयाणांप्रानरुच्यते तत्रायंत्रिपथस्थानंषट्कोणंचतुरंगुलम् रक्तंचकुलयोगज्ञैराज्ञाचक्रमितीर्यते कंठत्रयाणांनाडीनांविद्धनेविद्यतेनृणां सुषुम्नेडापिंगलानांषट्कोणंतत्व डंगुलं तत्यद्यचक्रमितिप्रोक्तंभ्रुकंठस्थमध्यगं त्रयाणामपिनाडीनांहृदयेचैकताभवेत् तत्स्थानंषोडशारंस्या त्तेप्रांगुलप्रमाणतः तत्पीठमुक्तयोगज्ञैरादियोडशचक्रगं ध्येयानामधमंत्राणांचिंतनस्यजपस्यच तस्मादा

रामः १७

जपेत्हृदयंतस्मादारीनिगद्यते पश्चात्त्रयंवोच्चारणात् तउक्तंनत्रैव निःसेतुचयथानोयंक्षरणान्निःसृतंप्रसर्पति मंत्र
स्तथैवनिःशेतुत्सरणात्सरतियज्वनां तस्मात्तदत्रमंत्रेषुचतुर्वर्णाद्विजातयः पार्श्वतोसेतुमाश्रयजपकर्मसमारभेत्
मंत्राणांप्रणवःसेतुस्तत्सेतुःप्रणवःस्मृतः चतुर्दशस्वरोयोसौशेषश्रीकारसंज्ञकः सचानुस्वारचंद्राभ्यांभुद्वारणंसे
तुरुच्यते अत्रशिवमित्युपलक्षणंसर्वपूजासमंगतमितिस्वयमभिधानात् यथा पूजयित्वाततोमालांगृह्णीयाद्दक्षिणे
करे अथमंत्रमध्यभागेवाजपित्वानुतर्जनीं अनामिकाकनिष्ठाभ्यांमुंचेयाननुभावतः स्थापयित्वातत्रमालांतं
गुह्यायेरणतर्जनं प्रत्येकंवीजमाश्रयत्रैकाङ्ग्रंथेनभैरवः प्रतिवारंपठेन्मंत्रंशनैरंगुष्ठेनचालयेत् मालावीजंतुजन्मत्रयं
स्पृशेन्नहिपरस्परं सर्वेजपप्रकर्तुंचांगुष्ठायेरणभैरव सर्ववीजंजपन्यस्तपरवीजंतुसंस्पृशेत् अंगुष्ठेनभवेन्नस्वनिष्फ
लःमजपःसदा नालास्वहृदयासन्नेधत्वादक्षिणपाणिना देवींविचिंतयन्नप्यंकुर्याद्वामेननस्पृशेत् अंकाग्रङ्ग्रंथेनभंगुर
ष्ठायेरणार्थः मालावीजंतत्संबंधीजानिः शेवागमे तर्जन्यानस्पृशेत्तत्रंकंपयेन्नविधूनयेत् नस्पृशेद्वामहस्तेनकरभ्रमं
नकारयेत् अक्षानांचालनेंगुष्ठेनान्यमक्षंनसंस्पृशेत् जपकालेसदाविद्वान्मेरुंनैवविलंघयेत् परिवर्तनकालेचसंघट्ट
नंवकारयेत् कलिःखटखटाशब्दैर्दोलमानेचलन्मतिः चलितेचैवविज्ञेयःस्फुटितेव्याधिसंभवः हस्तच्युतेमहाविघ्न
सूत्रच्छेदेविनश्यति चलितेमध्यमायांगुल्यंतरगते स्फुटितेमणौसूत्रच्छेदेगुणच्छेदेपीत्यर्थः तथा कालोक्तंतवः

जृंभायामेकमार्तनेत्यजेत् प्रमादान्नीष्ठीभवेदावर्त्तनंत्यजेत् आवर्त्तनंमंत्रस्य जपेनिविघ्नसंस्पर्शेक्षालयित्वाऽ
नर्जयेत् योगिनीतंत्रे सर्वासपिवमालासुमेरुःपार्श्वेविधीयते नस्पृशेत्तत्कदाचित्तुएष्यावर्त्तनंतुनः नस्पृशेत्तर्जनेनि
र्वत्तर्जनीस्पर्शस्यैवनिषेधादन्यांगुलीनामस्पर्शोसंभवाच्चेति तथामहाकपिलपंचरात्रे एकचित्तःप्रशांतात्माप्रश्च
मत्रकरःशुचिः भुग्नग्रीवोन्नतःशोनःकेदृन्मीलनवर्जितः सविसर्गसमात्रंचसविंदुसंक्षरंस्फुटं नडुतंनाविविश्रोतं
क्रमान्मंत्रंजपेत्सुधीः नारदपंचरात्रे अक्षरादक्षरंयावत्सर्वदोषविवर्जिते विलंबितंवनातीवनथास्पष्टभवेज्जवं चि
त्तविक्षेपरहितमत्यक्तधियान्वितं एवंकृत्वाजपंविप्रविनिवेद्यश्चयागवत् योगिनीतंत्रे अशोत्तरशतंवापिजपांते
शिरसिक्षिपेत् तंमालेसर्वदेवानांप्रीतिरत्नप्रदायम शिवंकुरुष्वमेमालेयज्ञोनीर्यैवसर्वदा पद्मलेशिखिबीजस्थं
सूक्ष्मंसूक्ष्मान्वितंभवेत् आकाशशशिसंयुक्तंसिद्धेहृदयमंभुतं एवंपंचाक्षरोमंत्रोमालायाःपरिकीर्तितः ग्रह
रोगस्यापनेनैवपूजनेविनियोजयेत् पद्मलेफकारःशिखीरेफःसूक्ष्मईकारआकाशशशीन्योर्विंदुर्द्वयंचंद्राभोयुतं सि
द्धेत्वरूपंहृदयंनमः फेत्कारिणीतंत्रे यथाशक्तिजपंकृत्वाप्राणायामत्रयंचरेत् नारदपंचरात्रे जपांतदक्षदीक्षि
यथाशक्त्युपचारादिकं निवेदयेद्विभोस्तुत्यावाक्कर्मनसान्विते ऐंपुंडरीकाक्षविश्वात्मन्मंत्रमंत्रेजनार्दन गृहाणो
मंजपंनाथममदीनस्यज्ञाश्वत इत्युक्त्वार्घोदकंपुष्पंकृत्वादक्षिणपाणिगं अग्रतोनिक्षिपेद्विद्यामूलमंत्रेणनारद

मंत्रात्माभगवन्विष्णुरचिरात्सिद्धिदोभव शिवायवाहसोमशंभुः मानसोपांशुभाष्याणांकुर्यादेकतमंजपम् मूलस्याथशतंजप्त्वानुतेनविलंबितं गुरुतिगुरुगोप्तात्वंगृहाणास्मत्कृतंजपं सिद्धिर्भवतुमेदेवत्वत्प्रसादात्वयिस्थिता भोगीश्वरकपर्दित्वानुदक्षहस्तेनसंभवे मूलमंत्रार्घतोयेनरक्षरक्षनिवेदयेत् नारदपंचरात्रे संपूज्याथजपंकुर्याद्यावद्वेप्रहरद्वयं नदूर्ध्वंपूर्वतस्नात्वाविशेषेणविधानवित् न्यासावसानमखिलंकर्मकुर्यान्मुरोदितं पूजाग्निहोमपर्यंतंततश्चजपमारभेत् यावद्दिनावसानंतुभूयःस्नात्वाततोद्विजं मुपास्यपूर्ववत्संध्यादेवंसंपूजयेत्पुनः विसृज्यभोजनंकुर्यात्ततंतारकोदये संध्यामुपास्यरेचंचपूर्ववत्पूजयेदित्यर्थः अथभोज्यानि त्रैलोक्यसंमोहनतंत्रे भीक्षान्नंविवाहविष्णासीकंदमूलफलाशिनः पयोव्रतीवानियतोजपेदेकाग्रमानसः भीक्षास्वरूपमाहकंभसंभवः वेदिकाचारमुक्तानांतुचीनांश्रीमतांसतां सत्कुलस्थानजातानांभिक्षासीचाग्रजन्मनोऽस्ति नारदः चरुमूलफलक्षीरहविर्भिक्षान्नसक्तवः एतत्सन्नविधंप्रोक्तंपवित्रंव्रतभोजने कपिलः यावीयवाग्राशाकंवपयोभक्षंहविष्यकं पूर्वपूर्वप्रशस्तंस्यादज्ञानेमंत्रसाधने हविरुक्तंकंभसंभवेन सितैकविधहैमेतमुण्मन्नस्त्रीयसंश्रितं अश्रुजावहनंपक्वामनुद्योल्हसंचयत् दधिक्षीरघृतंगव्यमेषवंशुद्धवर्जितं तिलाश्चैवासितामुक्ताकरंजमुकवर्जितं नारिकेरफलंचैवकदलीलवलीतथा आम्रमामलकंचैवपनसंचहरीतकी व्रतांतरप्रशस्तंचहविष्यामन्त्रनेऽधः अचेत्नवमलभ्यंवाप्यप्रशस्तंव्रतांतरे ना

शि.चं
१९

न्यमेवात्रतत्सर्वंयदिच्छसिद्विमात्मनः लशुनंपिण्डितांशीचविनीतःशोनचेतनः शोनातपः कैमतिकांसिताम्लिलेख्यांशु
ष्काम्लिलायवाः कलायकंगुनीवारावास्तुकंहिलमोचका षष्ठिकाकालाशाकंचमूलकंकेमुकेनरतः कंदसंचवरा
हुडगव्येचदधिसर्पषि पयोनुक्तसारेचपनसाद्रोहिनकी पिप्पलीमीरकंचैवनागरंगकतिंतिडी कदलीलवली
धात्रीफलान्यगुडुसैक्षवं घृतेतैलपक्वसुनयोहविष्यान्नंप्रचक्षते मूलकंहविरपिवैल्लवानांनिषिद्धं तडाकंविष्णुवानले
यत्रगांसंतथामद्यंतथाद्वंताकमूलके निवेदयेन्नैवतत्रहरेरैकांतिकीरतिरिति अथवर्ज्यानि तत्रकुंभसंभवः लवणं
चपलंचैवक्षारंरौडरसांतरं मावसूकमसूराद्यान्कोडवांश्चणकानपि तांबूलंचहिभुक्तंवदुःसंवासंप्रमत्ततां वर्जयेदिति
ब्रह्मयामले निश्चयोत्साहधैर्यैश्चतत्वज्ञानस्यदर्शनात् अल्पासीत्यंत्यसंगश्चषड्भिर्मंत्रःप्रसिद्ध्यति उद्यासीवङ्गभसीचप
जलोनियमाग्रहः नीचसंगाञ्चलोल्याच्चषड्भिर्मंत्रोनसिद्ध्यति अशंकितमनाश्चैवशिवशक्तिमयत्वतः देवमंत्रमयंसाक्षा
ध्यायेदात्मानमात्मनि मनोन्यत्रशिवोन्यत्रशक्तिरन्यत्रमारुतः नसिद्ध्यतिवरारोहेकल्पकोट्शतैरपि पर्युषंचारनालंच
कोडवान्नंमसूरिकां कांस्यपात्रंचतैलंचमंत्रवीर्य्यहराणिषट् वीर्यंविज्ञानयोर्हंत्रीज्ञानहंत्रीचपर्युषः तस्मात्सर्वप्रय
त्नेनमंत्रीपर्युषितंत्यजेत् आरनालंचान्यमद्यंमंत्रीदुग्धापरित्यजेत् फलंलोपोभवेन्नूनंमंत्रवीर्यंहरेद्ध्रुवं तेनकारणा
भावेनमंत्रीक्षारांश्चवर्जयेत् पित्तलंमृत्सुदंनूनंस्फडधान्यंचकोडवं कोडवान्नंपरित्याज्यंसर्वथाजपकर्मणि मसूरीमानहंत्रीच

रणः
१९

परित्याज्यावसर्वथा कांस्यपात्रमशुद्धंचतद्धदेविष्णुनापुरा मंत्रवीर्यहरत्वाशुयद्यपिस्यान्महेश्वरः तस्मात्सर्वप्रयत्नेनकांस्यं
ज्यंतुसाधकैः तिलतैलंमंत्रपूतंपावनंदेवदुर्ल्लभं मर्दयित्वाप्रयत्नेनस्नानंकार्यंहिसर्वदा वर्ज्जयेज्जपवेलायांभोज्यमेवसदाशु
धैः नभोक्तव्यंनभोक्तव्यंमंत्रिणातत्कदाचनेति अथभोजनपर्यायः तत्रकुंभसंभवः उपस्तीर्याभिचार्यैतत्संस्कृत्यप्रोक्ष
णादिभिः पावयेद्वैदिकैर्मंत्रैःपुनर्मूलेनमंत्रवित् वैदिकैःप्रोक्षणादिभिःपावयेदितिसंबंधः मूलेनमंत्रयेदितिशेषः तथा
सोभशंभुः हृदासंनोजपेन्मंत्रीपूतेराचामयेज्जलैः हृदाहृदयमंत्रेजलंचाभिमंत्रितंपिबेदिति पलाशपत्रेणमध्यपत्रव
र्जितेनकृतपत्रावल्यामेवभुंजीतनिवदंति कांस्यभाजननिषेधानियमइतितत्वं अथशयनं विजयमालिनीतंत्रे अथःशया
नःशुद्धात्माजितक्रोधोजितेंद्रियःनारदपंचरात्रे शुक्लाशायीतशयनेशुभेचसुशीतल अर्द्धरात्रेसमुत्थायपादशौचंभवे
द्द्विजः आचम्यदेवसंस्मृत्यशीघ्रंसंपूज्यपूर्ववत् जपंकुर्याद्यथाशक्तिअर्च्चयेच्चतथेश्वरिइति तथावैशंपायनः शयनंकुशशा
य्यायांविन्यसेत्कुचिवस्त्रधृक् नद्यासःक्षालयेन्नित्यमन्यथाविघ्नमाहरेत् इति तथावायवीयसंहिता अहतास्तरणास्तीर्ण
सदर्भेशयनेशुचिः मंत्रितेवशिवेध्यायन्प्राक्शिरस्कोनिशिस्वपेत् शिवमित्युपलक्षणंमंत्रितेस्वेनमंत्रेण कपिलपंचरात्रे
गुरुपार्श्वनंकृत्वाउपवासीजितेंद्रियः दर्भशय्यागतोसम्यगदृष्ट्वास्वप्नंनिवेदयेत् योगिनीतंत्रे यज्ञायतोदूरमुदेनुदेवमाहृत्य
मंत्रान्प्रियतस्तरेतान् लक्ष्येकभुग्दक्षिणपार्श्वशायीस्वप्नेपरिक्षेतयथोपदेशं मंत्रानितिवक्रवचनेनसकलंसूत्रंज्ञेयं मृत्यु

शि·वं २०

ने तथा भगवन्देवदेवेशशूलभृद्वृषवाहन इष्टानिष्टसमाचक्ष्वममसुप्तस्यशाश्वत स्वंसुप्तः कुशास्तीर्णेततः प्रयतमानसः
निशांतेपश्यनिस्वप्नंशुभंवायदिवाशुभं पिंगलामते तारोभिंदिद्वयंशूलपाणयेदिठईरितः स्वप्नमानवमंत्रोयंशंभुनापरिकी
र्त्तितः नमोजायत्रिनेत्रायपिंगलायमहात्मने वामायविश्वरूपायस्वप्नाधिपतयेनमः स्वप्नेकथयमेनित्यंसर्वकार्येषुशो
भनः क्रियासिद्धिंविधास्यामित्वत्प्रसादान्महेश्वर मंत्रतंत्रप्रकाशे ॐहृत्सकललोकायविघ्नेवे विघ्नायवि
श्वरूपायस्वप्नाधिपतयेनमः स्वप्नमानवमंत्रायकथितामानवादिभिः अथशुभस्त्वकस्वप्नः तत्रयोगिनीतंत्रे त्रिविधं
दर्शनंतस्ययथार्थंयथार्थकम् अयाचकंयत्सुस्थानांशस्यतानांचदर्शनम् यथार्थंतदयथार्थमस्वस्थानांविकारजं
अयाचकंमानसंचयथार्थफलमुच्यते येषांस्वरूपमाहयदिति दर्शनंदेवादीनां विकारजंपित्तादीनां मानसंमनोविकारजं
आगमसिद्धांते आद्येवर्षेवत्सरार्द्धद्वितीयेयामेपाकोवर्षेपादतृतीये मासेपाकःसैवरीतुर्ययामेसद्यःपाकोयोविसर्गेषुदृ
ष्टः आद्येयामेदृष्टस्यस्वप्नंस्ववर्षेवर्णमात्रेपाकःफलं एवमन्येपि विसर्गेनिशांते तथा क्रूरेधमामध्यमास्यादृष्टेनुत्तमो
त्तमे नविद्यतेरुत्तमोयस्याःसासिद्धिरुत्तमेत्यर्थः तानेवाहतत्रैव स्वप्नेपश्यतिवेदवंनिजेष्टंसर्वतोसुखं गुरुप्रसादमुत्तरवं राम:
निर्मलंचंडमंडलं गंगांभागीरथीभानुंलिंगिनंलिंगमैश्वरं प्रसन्नंतत्रयानीयान्तिद्धिंस्वप्ननिदर्शने प्रसन्ननिजेष्टदेवं २०
अतएवसिद्धिरिपि नारदपंचरात्रे क्षितिलाभःक्षतजाद्विनरणंवाग्निपूजनं होमःप्रज्वलितेवह्नौसंग्रामविजयस्तथा

हंसकोकगपूराणांरथारोहणमेवच कोकश्चक्रवाकः कपिलपंचरात्रे कन्यांछत्रंरथेदीपंप्रासादंकमलेनदीं कुंजरंवृषभं
माल्यंसमुद्रंफलतेद्रुमं पर्वतंचहयेनेक्षेमाममांसंसुरासवं स्वप्नादीनिसर्वाणिदृष्ट्वासिद्धिमवाप्नुयात् मुनिरपि यदास्व
र्गसुकन्येषुस्त्रियंस्वप्नेषपश्यति सम्पद्धितत्रजानीयान्नस्मिन्स्वप्ननिदर्शने भैरवीतंत्रे नदीसमुद्रनरणंआकाशगमनंच
था भास्करोदयनंचैवप्रज्वलंतंहुताशनं ग्रहनक्षत्रतारणांचंद्रमंडलदर्शनं नक्षत्राणिअश्विन्यादीनि ताराअन्यानि
हर्म्यस्यारोहणंचैवप्रासादशिरसोपिवा नागाश्वस्तृषभेंद्राणांतरुशैलस्यरोहणं विमानगमनंचैवसिद्धमंत्रस्यदर्शनं
लाभःसितर क्षैवदेवानांचैवदर्शनं स्वप्नादीनिसंदृष्ट्वानरःसिद्धिमवाप्नुयात् स्वप्नेतुमदिरापानंमांसंमांसभक्ष
णं कृमिविष्ठानुलेपंचरुधिरेणाभिषेचनं भोजनंदधिभक्तस्यश्वेतवस्त्रानुलेपनं सिंहासनंरथंयानंध्वजराजानिवेव
नं रत्नाभ्याभरणादीनिदृष्ट्वास्वप्नेप्रसीदति नारदपं· गुरुर्देवोद्विजःकन्याःगोगजाश्वाश्वकेशरी दर्पणंशंखभेर्यौचित
त्रैवाद्यंचरोचनं तांबूलंभक्षणंचैवतथादध्यभिवंधनं सिद्धान्नमाममांसंचमद्यस्त्रीमदिरासवा छत्रंपानंशुभंवस्त्रंतथा
यानश्वेतचंदनं माल्यमुक्ताफलंहारःपूर्णःसमुदितःशशी प्रचंडकीरणास्त्वंतिमन्नागाथमहोदधिःप्रफुल्लःपादपःशा
लिरोचनाकुंकुमंमधु लाजासिद्धार्थकावीजंनवभांडंचपायसं उपपन्नोभयाचार्योगायत्रीचरसंगता मनश्चेतिकरश्चै
त्येलोकेस्तदृपागतः सर्वेस्वप्नाःशुभाःप्रोक्ताःसिद्धिमोक्षफलप्रदाः अथाशुभसूचकाः नारदपंचरात्रे अतोन्येविपरीता

सुमनसःखेदराश्चये गर्हितालोकविद्विष्टास्वप्नास्तेष्यशुभावहाः चंडालकाककलभभूत्यगर्त्तमसंगले ड्वयंतैलाभक्तनग्न
शुष्कवृक्षप्रदर्शनं कंटकतरुनिर्मूलशासारस्यचदर्शनं रोगदमिति अतःउक्तशुभसूचकात् कलभंवालगजं तत्रप्राय
श्चित्तमाहकपिलः दृष्ट्वादुःस्वप्नकेचैवंहोमशांतिद्विजंवाजुयात् तथापिंगलामते शुभेशुभंभवेत्नत्यजुह्वात्शुभेश
तं अस्त्रेणेतिक्रमोविघ्नान्शांतिं तथानारदपंचरात्रे दृष्ट्वासमाचरेद्धोमंदंतकाष्ठोदितंमुने केवलेनाथवाज्येनसिंहमं
त्रेणशांतये दंतकाष्ठप्रकरणेतावदाहस्वयमेव शंतेमहसंसाष्ठांवायथाशक्त्याथवाद्विज अस्त्रसंपुटितेनैवंनाम्ना
स्वाहाचितेनच दोषान्जह्नीत्येवंपदंनामाचसानगं अस्त्रसिंहमंत्रयोर्विकल्पः सर्वदोषनिघ्नानां अथस्वप्ननि
वेदने तत्रैव शिष्यस्रुचिराचांतःपुष्पहस्तोगुरुन्नमं प्रणम्यशिरसाहृष्टस्तस्मैस्वप्ननिवेदयेत् स्वप्नेवाक्षिसमक्षंवा
आश्चर्यमतिहर्षंदं अकस्माद्द्विजायेननज्ञातव्यंगुरोर्विना मंत्रप्रसादजनितंलिंगंवतगुरोर्विना मंत्रप्रसादजनि
तंलिंगंवतगुरोर्विना प्रकाशनीयंविघ्नेन्दुकस्यचित्सिद्धिमिच्छता प्रकाशयतियोमोहादौत्सुक्यान्मंत्रजल्पके निकरस्था
श्चतासस्यसिद्ध्योर्यातिदूरतः आविर्भवंतिदुःस्वानिशोकाश्चविविधाअपि वक्तुंडकरेप चित्तप्रसादोमनसश्चतुष्टि रामः
र्नश्यतिशतास्वप्नपराभुस्वत्वं तथाभैरवीतंत्रे ज्योतिःपश्यतिसर्वत्रशरीरंप्रकाशयुक् निजंशरीरमथवादेवतामय २१
मेवहि नारदपंचरात्रेपि मैत्राराधनशक्तस्यप्रथमेवत्सरत्रयं जायंतेबहवोविघ्नानियमस्यस्यनारद नोद्विगंसाधको

यानिकर्मणामनसायदि तृतीयवत्सराद्ध्वंराजानश्चमहीभृतः पार्थयंतेतुरोधेनगर्विताश्चपिमानिना प्रासा
दःक्रीयतानाथमनोज्ञरणकारणं प्रज्वलंतंचपश्यंतितेजसाविभवेनच अतस्तेमुनिशार्दूलनिस्तुरंवक्तुमक्षमाः
नवमाद्वत्सराद्ध्वंस्वयंसिद्धतिमंत्रराट् नानाश्चर्याणिहृदयेमंत्रसिद्धिमयानिवै अत्यानंदप्रदान्याशुप्रत्यक्षेणवहि
स्तथा जडधीस्तक्षणंविप्रप्रणमन्तिमहर्षिनः क्षणंडुंडुभिनिर्घोषंश्रृणोत्यत्यंतरिक्षतः क्षणंचमधुरंवाद्यंनाना
गीतसमन्वितं आजिघ्रतिक्षणंगंधान्कर्पूरमृगनाभिजान् उत्पतंतंक्षणंचापिपश्यत्यात्मानमात्मना चंद्रार्कवि
रणाकीर्णक्षणमालोकयेन्नभः गजगोवृषमाद्यैश्चशुंड्याद्यक्षणंद्विज निर्झरांबुदसंक्षोभंक्षणमाकर्णयत्यपि
तारकाणिविचित्राणियोगिनोनभसिस्थितान् पश्यंतुयाह्ययंतस्यक्षत्रंमंत्रप्रतीसदा क्षणंकिलिकिलारावं
सवर्हिरवंतथा क्षणोमेघोदयंपश्यत्क्षणारात्रिंदिनेसति रात्रौचदिवसालोकंसस्यैरासमीक्षितं वलेनपरिपू
र्णश्चतेजसाभास्करोयमः शमेनयुक्तःप्रोद्वेनगोभीर्यैरासुखेनच स्वल्पाशनेनाकृशनावकृतापिनविद्यते विशू
त्रयोरथाल्पत्वंभवेन्निद्राजपस्तथा जपध्यानगतोमंत्रीनखेदमधिगछति विनाभोजनपानाभ्यांपक्षमासादिकं
सुने इत्येवमादिभिश्चिह्नैर्महाविस्मयकारिभिः उग्रैःसंप्रबोधयंप्रसन्नोमंत्रराडिति तथाबौधायनः सिद्धेस्तु
त्रीणिचिह्नानिदानाभोक्तात्रयाचकः दातभोक्तायथाचकइत्यर्थः प्रपंचसारे ततोस्यप्रत्ययास्त्वेवजायंतेउत्त

नोमनुं अधिष्ठितोनिष्पद्येयंनिश्चमिश्रंश्रद्दंभवेत् अर्काभःतेजसासोभवतिनिलिनजासंततेकिंकरीष्याड्डोगान
रूपंनिदृश्याद्भुतमथधनधान्योकुलंतत्समीपं देवानित्यंनमोस्मैविदतिफलि नानैवरूपंतिपुत्रापौत्रामित्राणिरु
क्मस्तनुविषदिपरंधामविष्णोःसभूयात् स्वंकृतेनसिद्धतिर्नेयंत्रयंवापुरश्चररणंकुर्यात् तऽकंफेत्कारिणीतंत्रे
कर्मणाप्रबलेनैवप्रतिबंधोविरोधिना यदिसिद्धिनलभतेद्विस्त्रिवीपुनराचरेदिति अथहोमपर्यायोविचार्यते
तत्रवाचवीयसंहितायां अथाग्निकार्यंवक्ष्यामिकुंडेवास्थंडिलेपिवा वेश्मन्यायसेपात्रेमृण्मयेवानचेभुभे
ज्ञानारणवे नित्यंनैमित्तिकंहोमंस्थंडिलेवासमाचरेत् गोमयेनोपलिप्तायांभूमौस्वस्थलरूपकं हस्तमात्रंतुतत्कुर्याद्वा
लुकाभिःसुशोभनं अंगुलोत्सेधसंयुक्तंचतुरस्रंसमंततः क्रियासारे समोस्तदिक्षुप्राक्प्रहःप्राग्दक्प्रणवोपिवा उद
क्प्रहःप्रदेशोवास्थंडिलस्यस्थलंस्मृतं प्रेहःप्रणवः तथाकपिलः स्थंडिलंवालुकाभिर्वारक्तम्रदुजसापिवा तथाव
शिष्ठः हस्तमात्रंस्थंडिलंवासंक्षिप्तेहोमैकर्मणि अत्रसंक्षिप्तेहोमकर्मणि अत्रसंक्षिप्तेरुत्यभिधानात्सहस्रादिसंख्यो
होमःस्थंडिलेनकर्त्तव्यइतिकेचित्तन्न होमेसमाचरेत्कुंडेस्थंडिलेवाथपूजिते अग्निप्रणायनंकृत्वाह्याचार्यःसर्व
वेदवित् नित्यहोमंव्याहृतिभिरष्टोत्तरशहस्रकमितिवायुपुराणवचनात् कुंडेवास्थंडिलेवापितत्रहोमोविधीयते
अयुतंहोमसंख्याचपालाशशमिधस्तथा इतिपद्मपुराणवचनात् अत्रहोमाशक्तौलुजपोशक्तस्यसर्वत्रेतिनारा

गरुगोष्ठाश्वत्थदुष्टमृगव्यालशोकावर्जितैकांतनिंदारहितैधार्मिकश्वेष्टदेवताभक्तजनाश्रयसुभिक्षनिरुपद्रवराजतत्व
विवादिगमनागमनस्थानानिरुतेषामन्यतमेस्थानेग्रामेक्रोशमात्रेनगरेक्रोशद्वयेनदीपर्वततीर्थरौप्यमाशारहितस्थानमाश्रित्य
नमामुकमंत्रस्यपुरश्चरणसिद्धये मयंगृह्यतेभूमिर्मंत्रोमेसिध्यनामिनिमंत्रेणभूमिपरिग्रहंविधायवटपिप्पलशमीडुंबरा
न्यतमवृक्षभवात् वितस्तिमात्रान्दशकीलकान्कृत्वाष्टमंत्रेणपृथक्पृथगष्टवारमभिमंत्रपूर्वादिग्विदिक्षिडेशानयो
र्मध्येनिर्ऋतिवरुणोर्मध्येवोर्ध्वाधोर्ध्वभागेषायतन्नदस्त्रमंत्रांतेस्वायनमः इतिप्रकीलमंत्रंसंपूज्यपूर्वादिक्षुदक्षादिक्षु
इंद्रंसोमंसायुधंसपरिवारंसवाहनंसपत्नीमाषभक्तबलिर्नमः इतिदशदिक्पालेभ्यः स्वस्वस्थानतन्कीलसमीपेमासभ
बलिंदत्वाक्षेत्रमध्येक्वचित् क्षेंक्षत्रपालायनमः गंगणेशायनमः वंवास्तुपुरुषायनमः इतिक्षेत्रपालगणेशवास्तुपुरु
षान्संपूज्यसुसमेस्थलेप्राक्प्रत्यक्दक्षिणोत्तरायताश्चनवसूत्रनवरेखाविलिख्यनवकोष्ठानिकृत्वातेषुपूर्वादिक्रमे
णप्रादक्षिणोनसप्तकोष्ठेषुकचटतपयशाख्यान्सप्तवर्गान्विलिख्येशानकोणलक्षौविलिख्यमध्यकोष्ठेनथैवनव
धाविभज्यतेषुपूर्वादिप्रादक्षिणोनअ आ इत्यादिशोडशस्वरान्क्रमशःक्रमेणाविलिख्यमध्यकोष्ठेश्रींकारंलिखेदितिकू
र्मचक्रंनिर्मायतत्रमध्यमगननेवकोष्ठेमध्येपूर्वादिषट्सुकोष्ठेषुचप्राक्षिणोनामनंतवृषभशैलराजवासुकार्थकृष्णऋ
षभयोनिमहाशंखछत्रायान्यवक्षेत्रपालान् ॐक्षैंअनंतक्षेत्रपालायनमः ॐक्षंवृषभक्षेत्रपालायनमः इत्या

दिक्षणावक्षेत्रपालबीजनत्रनामचतुर्थीनामीनान्गेधादिभिः संपूज्यग्रामादिनामाद्यक्षरयुक्तकोष्ठदिशिमुखेनदलाग्रेलदधःपा
र्श्वद्वयगतकोष्ठद्वयान्यनसेकूर्महस्तेवाएष्टे सर्वार्थसिद्धयेइतिनत्रराजवचनान्मध्यकोष्टात्मककूर्मपृष्ठे क्षेत्रमथेवाजपा
र्थंगृहीतवानानपनिवारणाक्षमंकुर्यात् अथवर्ज्यस्थानानि तत्रअकारेणागकारस्यारित्वेअस्वरस्यटकारेणालस्वरे
स्यपकारेणऔंकारस्यधकारेणजकारस्यटकारेणऊकारस्यकक्षारेणाउकारस्यनकारेणाफकारस्यटकारेणाअकारस्य
रेफेणायकारस्यसकारेणारित्वमन्योन्यमितियत्रस्थानसाधकयोराद्यक्षरेणाअरित्वेनतत्स्थानेत्याज्यमिति॥तदुदाहरणं
तुअमरकंटकस्थानेगणपतेःसाधकस्यारिर्भवति गरुडपुरममरेश्वरस्यापिहन्यमन्यत्राप्युक्तं अथजपमालासातुद्वि
धा मातृकाक्षरमयीमणिमयीचेतितत्रमणायस्तु पुत्रजीवशंखविद्रुमस्फटिकमुक्ताफलपद्मबीजसुवर्णरजतकुशग्रंथि
रुद्राक्षाश्चपक्षविशेषाः अथसंख्यातुसात्विकराजसतामसभेदेनाष्टोत्तरशतंषोडशत्रिंशन्निश्चेति अथजपमा
लायासंस्कारकाल तत्रविल्वोर्ध्वदशीपूर्वोक्तःशक्रेरक्तमिनवमीचतुर्दशीनवमीरात्री गणेशस्यचतुर्दशीमध्याह्न
शिवस्यत्रयोदशीदिवासूर्यस्यसप्तम्रमीचतुर्दशीपूर्वोक्तः इति अथमालायासूत्राणि विल्वोपपत्रसूत्रंकार्यासस्
त्रंवा देव्यापट्टसूत्रं शिवस्यैरंडीभवेवालकंलंवा सूर्यगणेशयोःकार्पाससूत्रंपट्टसूत्रंवाकार्यायथायोग्यमेवकार्यमिति
अथसंस्कारः तत्रप्रणवोक्तमात्रयागेसूत्रंगोमयदुग्धदधिघृतकुशनलात्मकंपंचगव्यंसंपाद्यशक्तिव्यतिरिक्तेषु०

पूर्वदिनेकभक्तसाधकःस्नानंकृत्वानित्यकृत्यंसमाप्यसूत्रंमणीश्चसंस्थाप्यनेषुप्रणवंभुवनेश्वरीबीजंमातृकाक्षराणि
चसूत्रेप्रतिबीजंबीजेषुचविन्यस्यमणीन्सूत्रेचगंधादिभिःसंपूज्यकुंडादौनित्यहोमविधिनाग्निंसंस्थाप्यथाशक्तिस
घृतैस्तिलैःकेवलघृतैर्वासघादिपंचमंत्रैर्हुत्वाहोमाशक्तौजपंवाविधायसूत्रेरुद्राक्षपुत्रजीवपद्माक्षैश्वेन्सुखेसुखंसं
यो०ज्यथासुखमन्यमणिनित्यारोप्यैकैकमणिमध्येगुरुक्रविधिनाब्रह्मग्रंथिविधायगोपुच्छाकारेणग्रंथयित्वास
र्वनस्थूलसजानीयमेकमणिमुद्भवसूत्रद्वयमेकीकृत्यमेरुंग्रंथयित्वासद्योजातमितिमंत्रेणापंचगव्येनशीत
लजलेनचप्रक्षाल्यवामदेवायनिमंत्रेणाचंदनागुरुकर्पूरकुंकुमैर्विलिप्य अथोरेभ्यइतिगुरुक्षीरशर्करागुग्गुलु
घृतचंदनघृतैर्धूपयित्वा तत्पुरुषायेतिगंधचंदनकस्तूरीकुंकुमकर्पूरैर्लेपयेत् ॐईशानइतिमंत्रेणाप्रतिबीजे
शानंशतमभिमंत्रयेत् मेरुंचानेनाघोरेभ्यइत्यनेननवशतंशतमभिमंत्रयेत् ततस्तत्रपूर्वोक्तवक्त्रभेदेनस्वस्व
रुद्राक्षस्यावदेवतामावाह्यावाहनस्थापनसन्निधायनसन्निरोधनसमुखीकरणासकलीकरणावगुंठन्म
नीकरणापरमीकरणानिनत्वन्मुद्रयाविधायषडंगैःपंचभीर्मंत्रैःप्रतिबीजंपंचोपचारैस्तांदेवतांस्वेष्टदेवताव
त्पूजयित्वेष्टंसंस्कृतमालायाजपंकुर्यादिति जपनालंसंस्कारविधिः इत्थंप्रतिष्ठितमालयाजंकुर्वन्यदानत्सूत्रं
जीर्णमधिजानातिनदैष्टंसूत्रंग्रंथयित्वातयाचेष्टंमंत्रमष्टोत्तरशतंप्रायश्चित्तार्थंजपयित्वापश्चान्नयामालयाय

थापरंवेजपंकुर्यात् अथवेष्टनिष्ठाप्रकारस्तुरुद्राक्षस्यैवनान्येषां तं अन्येषांपद्माक्षादीनांतुप्रतिष्ठाविधिःप्रदर्श्यते तत्रग्रंथि
तोमालांकुत्रचित्यात्रेसंस्थाप्यतस्यांगणेशसूर्यविष्णुशिवदुर्गाःपृथक्पृथक्आवाह्यसंपूज्यहौंमंत्रेणपंचगव्येनिक्षिप्यप
नस्तोनस्माद्धृत्यस्वर्णपात्रस्थेपिप्पलपत्रस्थेवाधूपवासितेपंचामृतेनिक्षिप्यतनस्तोयंहृत्याशीतलजलेनिक्षिप्यप्रक्षाल्यंद
ध्नागुरुकस्तूरीकर्पूरकुंकुमसोधिकैरनुलिप्यतस्यो स्त्रौंमितिमंत्रमष्टोत्तरशतंजपित्वानवग्रहान्दशदिक्पालान्क्षेत्रपा
ल्यष्टतैस्तिलैर्पथाशक्तिस्वेष्टमंत्रेणहुत्वागुरवेदयथाशक्तिकांचनंदक्षिणांदत्वाब्राह्मणांश्चान्नादिभिस्तोषयेदिति अ
थवास्त्रंमंत्रमालांश्चपंचगव्येनदिनत्रयंसंस्थाप्यचतुर्थदिनेसंधृत्यास्त्रमंत्रेणप्रक्षाल्यहृन्मंत्रेणग्रंथयित्वास्थंडिलेस्वेष्ट
देवतापूजामंडलेविधायतत्रस्वेष्टदेवतांसंपूज्यमूलमंत्रमष्टोत्तरशतंजपित्वास्वेष्टदेवताकरेकरन्यस्यहृन्मंत्रेणाहुतये
ननवाग्यथाशक्तिहुत्वामंडलमध्येमालांसंस्थाप्यतस्यामस्त्रमंत्रेमूलमंत्रंषडंगन्यासांश्चविन्यस्यस्वेष्टदेवतारूपंविचिंत्य
वक्ष्यमाणविधिनासर्वभूतबलिंदत्वातस्यामिष्टदेवतांसंपूज्यार्घंदक्षिणादिभिःपरितोष्यप्रणम्यब्राह्मणांश्चान्नादिभि
स्तोषयेदिति इत्थंप्रतिष्ठितमालयावान्यंमंत्रंजपेत् अथपरश्चरणकालेविहितानिक्रमतःसंहरणशौचमौनमंत्रा
र्थचिंतनाद्यवधानानिवैदग्ध्यंब्रह्मचर्यंजपोत्साहक्रोधन्यागस्वर्णाश्रयधर्मानुष्ठानपरिनुष्टेंद्रियंनिग्रहबलंचर्यगुरुनतिके
वलामलकस्नानमंत्रेदिमंत्रितजलेनाभिषेकंस्त्रिष्ठवणंद्विशवरमशक्तौशक्तस्नात्वानंदेवर्षिपितृस्वेष्टदेवतानर्पणं

राम
२४

मध्यपत्रहितबलाशपत्ररविनपत्रावल्गोरात्रौहितसितजनोगोवालादिशुक्लपाचेति अथनत्कालविधिज्ञानि अधियान्
नभाषणोकरंजविभीतकार्कसुहीछायाक्रमराघनियहस्त्रीशूद्रपतितनास्तिकोछिष्टसंभाषणंस्नानतर्पणाद्यनुष्ठा
नवस्त्रैकवस्त्रमलिनवस्त्रधारणाकाम्यकर्मासंकल्पितस्वधर्माश्रमविहितकर्माचरणाकांस्यभोजनदिवाभोजनासङ्गा
वणात्पूजनकौरिल्यक्षौरासाधुसमागमोस्नजलस्नानोन्मर्दनगीतवाद्यादिश्रवणान्त्यकर्दनाद्यविधमैथुनतत्कथा
लापक्षुद्रकर्मास्नानस्यसंघाणिहिंसाकंडुकोत्सीघ्रधारणाकरघ्राच्चवरणाकेशमोक्षरणाशिरघ्रावरविचिंताक्रोधक्षमत्व
रामनोरथशयनोत्थाप्यगमनोधकाशमंगलस्थानपादुकाधारणायानाद्यारोहणापादघ्रसारणोत्करासनक्षुज्जृं
भाहिक्काविकलमनस्त्वानशनप्रोक्षपादनग्नकृशराहित्यादीनि अथाशानानि तत्रव्याघ्रचर्मसृगाजिनचेत्रनिर्मितवं
वलकुशकटरक्तपट्टवस्त्रात्मकानिविहितानि तथानिषिद्धानि वंशरविनदारुमयपाषाणात्तावस्त्रपत्रवेष्टकानि
र्मितानिकेवलभूनलंचेति अथपरश्वरणारंभपूर्वदिनकृत्यं तत्रप्रातःस्नात्वानित्यक्रियांनिर्वर्त्यब्राह्मणान्भोज
नादिभिःसंतोष्यित्वा गुरुमपित्रस्त्रभरणादधधान्यादिभिःसंतोष्यजपस्थानेत्रिकोणंचतुरस्रमंडलेक्षेक्षेत्रपा
लायनमःक्षेत्रपालहुंगच्छहुंक्षेत्रपालमापयोक्तमंत्रेणाक्षेत्रपालंगंधादिभिःसंपूज्यतद्वत्रिकोणमंडलेसाधा
रंसान्नघृतजलोदकपूर्णंबलिपात्रंनिधायस्वस्तिहिविघ्नविघ्नरूपरुभंजयभंजयनर्तयनर्तयविघ्नविघ्नमहाभैरव

क्षेत्रपालबलिंगृह्णगृह्णस्वाहा इतिमंत्रेणबलिंदत्वोपवसेत् अथप्रातःपारंभदिनकृत्यं तत्रशुभेमासिचंद्रतत्सानुकूलेतिथिवा
रनक्षत्रा शोधितेदिवसेप्रातःस्नात्वागुरुविप्रान्नामादायब्राह्मणैःस्वस्तिवाचनंकारयेत्वाकुशहस्तः ॐसूर्यसोमोनमःकृत
संधेभूतान्यहक्षपा पवनोदिकपतिर्भूमिराकाशंरवचरामराः ब्राह्मेशायनमास्थायकल्पमिहसंनिधिं इतिपठित्वानाम्ना
पात्रेकुशतिलाक्षतजलान्यादायोददङ्मुखः ॐअद्यामुकेमासिअमुकराशिगतेभवितरिअमुकपक्षेअमुकतिथौभारत
वर्षाख्यभूखंडदेशेविशेषक्षेत्रेवेदमुककक्षेत्रेअमुकगोत्रःअमुकशर्माक्षत्रियश्चेदमुकवर्मावैश्यश्चेदमुकगुप्तःशूद्रश्चेद
मुकदासेमुकमंत्रसिद्धिकामोमुकंमंत्रसेयत्संख्याजपात्मकंपुरश्चरणमहंकरिष्ये अद्यारभ्येतावद्दिनैरहंकरिष्ये इति
वासंकल्पंविधायगुरुगणपतिदुर्गामातृःनत्वापूजोसमाप्यजपमारभेत् तत्रमूलमंत्रेणप्राणायामत्रयंकृत्वामूलमं
त्रस्यऋष्यादिकरषडंगन्यासान्विन्यस्यहृदिदेवंध्यायन् जपमालांवामहस्तेकृत्वाचित्वात्रेवासंस्थाप्यार्घोदकेनमूल
मंत्रेणसंप्रोक्ष ॐमालेमहामायेसर्वशक्तिस्वरूपिणी चतुर्वर्यत्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव इतिगंधपुष्पाक्ष
तैर्मालासंपूज्य ॐअविघ्नकुरुमालेत्वमितिमंत्रेणदक्षिणहस्तेनमालादायस्वशिरश्चित्रीगुरुकंठेपीतवर्णमूलमंत्रे
हृदयेस्वेष्टदेवंगुरुपादयोःस्वात्मानंचध्यात्वाभ्रूमध्यस्थाज्ञाचक्रेगुरुदैवतमंत्रात्मनामैक्यंविभाव्यकंठविशुद्धिचक्रे
नचनुष्टमेकीभ्रूनेसुषुम्नावर्त्मनानीयतत्रदेवंध्यात्वामूलमंत्रेणहृदयस्थानाहतेचक्रमानीयतत्रापिदेवंध्यायन्

णीयवचनाज्जपस्यकार्यः तत्ब्राह्मणैः पुरश्चरणजपसंख्याचतुर्गुणजपस्यकार्यः क्षत्रियैश्चक्रुणाः वैश्यानां अष्टगुणः होमकर्मणपसक्तानांत्रयाणांजपसाम्यता होमकर्मणपसक्तानांवेदर्तुवसुसंमित इतिसारसंग्रहवचनात् तदशक्तौतुविप्राणांद्विगुणःक्षत्रियाणांत्रिगुणःवैश्यानांचतुर्गुणः होमकर्मणपसक्तानांविप्राणांद्विगुणो जपः इतरेषांतुवर्णानांत्रिगुणाद्विर्विधीयते इतिगौतमवचनात् तत्राप्यशक्तौहोमसंख्याचतुर्गुणाजपःकार्यः होमाशक्तौजपंकुर्याद्होमसंख्याचतुर्गुणामितिवशिष्ठवचनात् एतदपिविप्रमात्रपरं क्षत्रियवैश्ययोःप्राग्वत्त्रयक्रुणाजपो क्तगुणाजपोभवतिप्रागुक्तवचनात् तत्राप्यशक्तौहोमसंख्याद्विगुणाजपोवाकार्यः यद्यदंगंविहीयेतततत्संख्याद्विगुणो जपः कर्त्तव्यःसांगसिद्ध्यर्थंतदशक्तेनभक्तितइति कुंभसंभववचनात् तदशक्तेनपुरश्चरणासंख्याचतुर्गुणादिकरणाश क्तेनएतदपिविप्रमात्रपरं क्षत्रियवैश्ययोस्त्रिगुणाचतुर्गुणाजपोभवति प्रागुक्तगौतमवचनादेव द्विजभक्तेनरभूद्रा णांचतुर्गुणपक्षेदशगुणाजपोभवतिद्विगुणपक्षेपंचगुणइति द्विजभक्तशूद्राणांपंचवर्णमाश्रितोयःशूद्रःततस्त द्वर्णविहितजपस्यवेति तदुक्तंसारसंग्रहे द्विजानांहोमविरहेयःप्रोक्तःसूरिभिर्जपःतथोषितं सर्ववोक्ताशूद्रोयंव र्णमाश्रित तत्स्त्रीणांविहितंजापंकुर्याच्छक्तिपरायणः इतिगौतमोप्याह होमाभावेद्विजानांतुजपःप्रोक्तपुरातनैः तत्सुधावांश्चतद्भक्तशूद्राणांचसर्ववर्णानि अतःस्त्रीहोमानधिकाशूद्रैर्होमानधिकाराज्जपस्यकार्यः सारसंग्रहे

ततोहोमदशांशेनजलेसंपूज्यदेवतां तर्पयामीतिमंत्रांतेऽवोक्षाभिर्मूर्द्धितर्जयेत् वेशंपायनः ततोहोमदशांशेन तर्पण
स्यदशांशेननमोंतंमंत्रमुच्चरन् अभिषिंचेत्स्वमूर्द्धानंजलैःकुंभास्यमुद्रया सारसंग्रहे तदंतेभोजयेत्विप्रान्सदा
चारान्दशांशतः नानाविधैर्भक्ष्यभोज्यैर्लेह्यैश्चोष्यैस्तथेतरे सर्वथाभोजयेद्विप्रान्ऋतसोगत्वसिद्धये विप्राराधन
मात्रेणाध्वगंसोगत्वमाप्नुयात् एकमंगंविहीयेतततोनेष्टमवाप्नुयात् अंगहीनेभवेद्यत्तत्कर्मनसार्थसाधकं सूनानि
रिक्तकर्माणिनफलंतिमनोरथान् तस्मात्पूर्णतोयातिसमस्तानिभवंतिचेत् अनायासेनविदुषाभोजयेत्सर्वकर्मसु
यानियान्यधिकर्माणिहीयंतेद्विजभोजनैनिरर्थकानितानिस्युर्वीमान्सूत्वरंगनिचत्॥गुरुंसंतोषयेत्प्राज्ञोहिरण्यांबरा राम
दिभिः गुरोर्गुरौहिसंतुष्टेमंत्रसिध्यतिमंत्रिणः इत्थंपरश्चरणान्नप्रसन्नादेवताभवेत् कुलार्णवे यदृच्छयाकृतेमंत्रे २६
फल्पनापिछलेनवा परेणमाथवा तज्जपेद्यद्यनर्थकृत् उक्तंकलिविनान्मंत्रान्आलोक्यप्रजपंतियेऽकुरु
त्यासमंतेषांपातकंपरिकीर्तितं अनेकोटिमंत्राणांविघ्नव्याकुलकारणं मंत्रेगुरुमुखात्प्राप्तमेकंस्यात्सर्वसिद्धिदं
सुंदराचार्यसिरत्नेन श्रीनिवासेनधीमता चंडिकायांप्रणीतायांषट्काशोगात्रयोदशः इतिश्रीसुंदराचा
र्यचरणारविंदद्वंद्वांतेवासिताश्रीनिवासभट्टेनविरचितायांश्रीशिवार्चनचंडिकायांत्रयोदशःषट्काशः
अथपरश्चरणप्रयोगः तत्रादौजपस्थानानि तत्रसमुद्रतीरपर्वतशृंगसमुद्गामितदीतीरविष्णुगृहेविविक्तनिज

दयसमीपेमालामानीयदक्षिणादहस्तमध्यमांगुलिमध्यपर्वणिसंस्थाप्यैकविंशोभुग्नग्रीवोन्नतगात्रःकंदून्मीलनरहितःस्वदक्षस्क
दिशंकुर्वन्मंत्रार्थगतविंशोमालायांप्रतिबीजेमंत्रेमुच्चरणपूर्वबीजसमयेप्रणवबीजमस्यस्थानप्रणवोच्चारपूर्वमंत्रमारभ्यज्ञातः
कालान्मध्यदिनावधिदशाघ्नषडवसंभावनयोत्तरयालमानीयेवासार्द्धप्रहरत्रयंवधिंजपित्वासर्वंशोषाकृत्वेनपुनः प्रणवमु
च्चार्यजपंसमाप्यतंमालेसर्वदेवानांप्रीतिदासुभदामम शिवंकुरुष्वमेभद्रेयशोवीर्यंचशर्वदा इतिमंत्रेणमालांस्वशिरसि
निधायपुनःप्राणायामत्रयंकृत्वाऋष्यादिकरन्यंगन्यासान्विधायार्घोदकेनाष्टाक्षरमंत्रेणजपंसमर्प्यप्राक्तमालापूज
नमंत्रेणमालांसंपूज्यरहस्यिस्थापयेत् अत्रप्रणवोच्चारणानुत्रैवर्णिकानांव ब्रह्मादीनांतु श्रीकारस्त्वाद्येनयोप्रणवेन
प्राप्तइति ततोमध्याह्नादिकेविधायपुनः पूजोविस्तरतःकृत्वाप्रतिदिनहोमपक्षेजपदशांशंकल्पोक्तवैविधिनालेस्क
तैर्ग्नौकृत्वाहोमदशांशंतर्पणंदशांशंमार्जनंमार्जनदशांशंब्राह्मभोजनंचप्रत्यहंकुर्यात् प्रतिलक्षहोमपक्षेएकलक्षसं
ख्योजपःसमाप्यतद्दशांशहोमादिकंकृत्वाग्निमलक्षजपमारभेत् कल्पोक्तसंख्याजपसमाप्त्यनंतरंहोमपक्षेकल्पोक्तसंख्यज
पंसमाप्यपश्चात्तद्दशांशहोमादिकंकुर्यात् इतिपक्षत्रयेप्येकःपक्षःकार्यः होमपर्यंतंप्रागेवदीक्षाप्रकरणोक्तं
होमाशक्तौउपस्थकार्यस्तत्रब्राह्मणैःपुरश्चरणसंख्याचतुर्गुणाकार्यः क्षत्रियैरष्टगुणावैश्यैरष्टगुणाः अत्राशक्तौब्राह्मणै
पुरश्चरणसंख्याद्विगुणोजपःकार्यःक्षत्रियैस्त्रिगुणोवैश्यैश्चतुर्गुणोजपोभवति तत्राप्यशक्तौहोमसंख्याद्विगुणाज्यो

वाकार्यइति स्नतदपिविप्रमात्रपरंक्षत्रियवैश्ययोस्तुद्विगुणाजनुर्गुणाजपोभवति द्विजभक्तेनरशूद्राणांदशगुणाजपोभवति
चतुर्गुणापक्षेनुपेचगुणाजपइति द्विजभक्तशूद्राणांनुपेचवर्णाश्रितोयःशूद्रःनवर्णाविहितजपस्य द्विजस्त्रीणाम
पितथैवेति स्त्रीशूद्राणांहोमानधिकाराज्जपस्यविहितइति इत्थंहोमंविधायवेदानागुरुकर्पूरादिसुवासितैर्जलैर्हृ
मेसेरव्यादशोक्तः प्रागुक्तविधिनाजलेदेवंध्यात्वामंपूज्यसेनपंस्वात्मानंदेवतारूपंध्यायकुंभमुद्रयामूलमंत्रेणा
त्मानमभिषिंचामिनमः इतिनपंरामेरव्यादशोक्तनःसमूर्द्धन्यभिषिंचाभिषेकदशोक्तसेरव्याकान्स्वेष्टस्वेष्टदेवतान
भक्तान्सदाचारान्ब्राह्मणानिमेभ्रातॄभ्यांगादिनास्नपयित्वावस्त्रगंधादिभिरलंकृत्यषड्रसैर्नानाविधैर्भक्ष्यभोज्यैस्वेष्ट
देवतायुध्याभोजयित्वातांबूलदक्षिणादिःपरितोष्यविसर्जेदितिप्रत्यहंलक्षंतावत्संख्यंसेरव्यासमाप्तौवाभक्तिपूर्व
कंकुर्यादिति ततःप्रकृतेमध्याह्नपूजानंतरंवैश्वदेवादिकेमाह्निकंविधायस्वेष्टदेवतामंत्रजपंध्यानकीर्त्तनश्रवणा
दिनादिनशेषंनीत्वाशक्तौशायंतनस्नानंविधायदेवंसंपूज्यभुंजीत तत्रभोज्यानिभक्ष्यंशुद्धैकविधात्रिरहंमनिष्कनी
वारषष्टिकाकेगुडयवाशूद्रानवहतःपादाभ्यामनुत्क्षाल्यावहनागुडवर्जितमेक्षवंकृष्णतिलमुद्गधकलापकैःमुक्तवर्जकं
रंभाविशेषनालिकेरकदलीफलवल्लीअपनसाबलकार्डकहरीतकीवास्तुःकंकालशाकहिलमोचिकासैंधवसामुद्र
लवणोनधृतसारशिगव्यानिपिप्पलीरकनारंगकतिन्त्रीडीमूलकानि अथवर्ज्यानि गुणाकृत्रिमलवणक्षारलव

रात्रिवन्नवर्षुविननिस्नेहकीटादिदूषितकंजिकगंजनविल्वकरंजशतमृणालकोऽवमेदकनैलपद्मनाथनसूरवणाकगोधूम
देवदेवधान्यानीति अनिभोजनेनंदिवाभोजनेच अथभोजनपर्यायः तत्रस्वेष्टदेवताप्रसादनमंत्रेनमंत्रपत्ररहितपलाशेप
त्रैःकल्पितपत्रावल्यांसंस्थाप्यवैदिकमंत्रैःसंस्कृत्यमूलमंत्रेणाभोक्ष्यप्रतिजवंमूलमंत्रेणासनंधामिमंत्रहिनेहिनेहन्मंत्रेणाश्री
यात् मूलमंत्रेणद्वात्रिंशद्वाश्मभिमंत्रितंजलेचपिवेदिति अथशयनं तत्रकृशाग्निर्मितायांशय्यायांप्रक्षालितार्पाक्षा
राडिप्रक्षालितवस्त्रमास्तीर्यशय्यांमूलमंत्रेणसप्तवारमभिमंत्र्ययज्जाग्रतइतिसूक्तस्यशिवसंकल्पऋषिःत्रिष्टुपछंदः म
नोदेवतासूक्तजपेपिनियोगाः यज्जग्रतोदूरमुदैतुदैवंयदुसुप्तस्यतथैवैति दूरगमंज्योतिषांज्योतिरेकंतन्मनःशिवसं
कल्पमस्तु येनकर्माणपसोमनिषिणोयज्ञेकृण्वंतिविदथेषुवीराः यदपूर्वंयक्षमंतःप्रजानांतन्मेमनःशिव०
२ यत्प्रज्ञानमुचेतचेतोधृतिश्चयज्योतिरंतरमृतंप्रजासु यस्मान्नऋतेकिं चनकर्मक्रियतेतन्मेः ३ एतेदेदेसुभू
वनेतेभविष्यत्परिगृहीतममृतेनसर्वं येनयज्ञस्तायतेसप्तहोतातन्मे ४ यस्मिन्नृचःसामयजूंषियस्मिन्प्रतिष्ठिता
रथनाभाविचाराः यस्मिंश्चित्तंसर्वमोतंप्रजानांतन्मे ५ सुषारथिरश्वानिवयन्मनुष्यान्नेनीयतेभीशुभिर्वाजिनइ
वहत्प्रतिष्ठंयदजरंपविष्ठंतन्मेमनःशिवसंकल्पमस्तु ६ इतिमंत्रान्हिपठित्वा ॐभगवंदेवदेवेशशूलभृद्वृष
वाहना इष्टानिष्टेमनाचक्ष्वममसुप्तस्यशत्रून ॐहिलिहिलिशूलपाणयेस्वाहा नमोजायत्रिनेत्रायपिंगलायमहा

शि च २८

न्मने वामायविश्वरूपायस्वप्नाधिपतयेनमः इतिमंत्रोश्वसकृत्पठित्वाप्राक्शिरादक्षिणापार्श्वशायास्वपेत्परिष्यते तत्रसुख्यो
नोषथमेऽहरेहरेत्स्वप्नस्यवर्षेणाफलंद्वितीयेषडेमासेतृतीयेमासत्रयेणचतुर्थेमासेननिशंतेसद्यःफलंज्ञेयमिति अथ
सिद्धिसूचकस्वप्नाप्रसादसुरवस्वेष्टदेवतागुरुनिर्मलसूर्यचंद्रलगंगागोसरस्वतीसन्यासिशिवलिंगानोदर्शनंभूमिलाभःरत्नर
सुवर्णरौप्यद्रव्यजपहोमवह्निपूजनहेमचक्रवाकमयूरसरथरोहणकन्याछत्रध्वजदीपप्रासादगजाश्वमाल्यसमुद्रसर्पकुल
वृक्षपर्वतापवित्रामांसरुधिरासुरासवसर्वस्त्रीदर्शनंनदीतरणंकाशागमनग्रहनक्षदर्शनहर्म्यप्रासादशिखरगजाश्ववृषभ
नरुपर्वतशिखारारोहणविमानगमनलाभदेवीदर्शनानिमदिरापानमांसभक्षणपुरीषानुलेपनरक्तानिषेकरत्नाभरणादि
दर्शनानि अथाशुभसूचकाः चंडालकलभकाकशून्यगर्त्तानंगलडघतैलाभ्यक्तनरनग्नस्त्रुक्षवृक्षकंटकनरुतलरहित
प्रासादेदर्शनेरोगदं तत्रप्रायश्चित्तंनृसिंहमंत्रंपठित्वाद्रुस्वप्नसूचितंनदोषान्जहिपुनर्नृसिंहमंत्रंपठित्वास्वाहा इत्यष्टो
त्तरशतंघृतेनजुहुयात् अथवास्वमेवास्तुमंत्रेणवाहोमःकार्यः नृसिंहमंत्रस्त्वेकाक्षरः सचभगेनस्त्रुकरोद्रष्टव्यः अ
स्तुमंत्रस्तुस्वोपास्यमूलविद्यया अथस्वप्ननिवेदनं तत्रगुरुचरणारविंदयुगलेप्रणम्यपुष्पहस्तःस्वप्नंतस्मैनिवेदयेत्
न गुरोरन्यत्रनप्रकाशयेत् अथसिद्धिचिह्नानि चित्तप्रसादोमनुष्टिस्वल्पाहानिप्रातःपश्योनिदर्शनाकस्मादनिहर्षनरि
क्तस्थदुंदुभिशब्दमधुरवाद्यनानागीतश्रवणाकर्पूरादिसुगंधपरिमलाघ्राणचंद्रार्ककिरणादीर्घालोकनानि स्वेकृतेन

राम २८

सिद्धतिचेद्विसृज्यैवं पुनर्जपेत् अथमंत्रसिद्धेरन्यप्रकारः तत्रकुलप्रकाशतंत्रे अथवान्यप्रकारेणापरश्चरणमु
च्यतेग्रहणेऽर्कस्यचेंदोर्वाशुचिः पूर्वमुपोषित नद्योसमुद्रगामिन्यांनाभिमात्रेभस्थितः स्पर्शाद्विमुक्तिपर्यंतंजपेन्मंत्रस
माहितः तावत्कालेजपित्वेत्थंततोहोमादिकंचरेत् अयमर्थः तत्रसूर्योपरागेपूर्वदिनमुपोषितश्चंद्रग्रहणेतद्दिनस्वे
पोषितोग्रहणंदृष्ट्वास्नानंविधायाद्यामुकेमासिअमुकराशिनलेसवितरिअमुकतिथौअमुकपक्षेभारतवर्षाप्यभूप्रदे
शेअमुकतीर्थेसूर्यग्रहणेवाचंद्रग्रहणेवाअमुकगोत्रःअमुकशर्मेत्यादिअमुकमंत्रसिद्धिकामःअमुकग्रहणनिमित्तमपमा
रभ्यविमुक्तिपर्यंतममुकमंत्रजपहंकरिष्ये इतिसंकल्पकृत्वाविमुक्तिपर्यंतंजपेत् ततोग्रहणकालेनजपदशांशहोम
महंकरिष्येः इतिहोमसंकल्पः होमशक्तौघृतक्तस्वजपकार्यः अपरस्तुमंत्रसिद्धिपर्यायः तत्रकुंभसंभवः कृष्णा
ष्टमीसमारभ्यावत्कृष्णचतुर्दशीदेवंध्यात्वाजपेन्मंत्रमयुतांचतुष्टयं दशांशंहोमयेत्पश्चात्तर्पयेदभिषेचयेत् ततः
सिद्धोभवेन्मंत्रइति अयमर्थः तत्राद्येत्यादिअमुकमंत्रसिद्धिकामःकृष्णाष्टमीमारभ्यकृष्णचतुर्दशीपर्यंतंअमु
कमंत्रस्यायुतचतुष्टयजपनदशांशहोमादिसहितंपरश्चरणमहंकरिष्ये इतिसंकल्पविधायायुतचतुष्टयंसप्तधा
विभज्यप्रत्यहंचतुर्दशोत्तरसप्तशताधिकसहस्रपंचकंजपित्वातिमदिनेषोडशोत्तरसप्तशताधिकसहस्रपंचकंज
पेदित्येवमयुतचतुष्टयंकृत्वातदशांशहोमादिकंकुर्यादिभिः अन्यप्रकारस्तु श्रीकुलार्णवे मंत्रीनुव्रजपेन्मंत्रम

त्कक्षरसंपुटं अनुलोमविलोमेनमंत्रसिद्धिर्भवेत्तदा त्रिषष्ट्यक्षरसंपुटं क्रमोक्रमाच्छतावृत्यामासात्सिद्धो भवेन्मनुः मातृकाजपमात्रेणमंत्राणांकोटिकोट्यः सिद्ध्यन्तिनचसंदेहोयस्मात्सर्वंतदुद्भवमिति अयमर्थः क्रमोक्रमात्मातृकापुटितेमंत्रेप्रतिदिनशतेभासमात्रंजपेदिति अत्रपित्र्येत्यादिक्रमोक्रममातृकाउदितमंत्रस्यमासमात्रंप्रतिदिनंशतसंख्याजपमहंकरिष्ये इतिसंकल्पंविधायप्रतिदिनंजपेत् मातृकासंपुटप्रकारस्तु ॐॐौंईंईंउंऊंऋंॠंऌंॡंएंऐंओंऔं अंअः कंखंगंघंङंचंछंजंझंञंटंठंडंढंणंतंथंदंधंनंपंफंबंभंमंयंरंलंवंशंषंसंहंक्षंरामक्षंहंत्रंवंशंवंलयंपंपंनंतंटंपंचंपंकंअंःअंऔंऔंऔंएंऐंऌंॡंऋंॠंउंऊंईंईंऔंऐं इतिशतवारंमूलमंत्रंजपेत् त्रिषष्ट्यर्णामातृकातुकूचप्रतिशाख्ये त्रिषष्टिश्चातःषष्टिर्वायथासंभवतोमताः चाकृतेसकृतेवापिस्वयंप्रोक्ताःस्वयंभुवाः स्वराविंशतिरेकश्चस्पर्शानामंवविंशतिः पादयश्चस्मृताषोचत्वारश्चनमात्मनाः अनुस्वारोविसर्गश्चक्ष्व्रौचापिपराश्रयौ ऽःस्यशश्चेतिविज्ञेयोल्कारःप्लुतस्यवेति नह्विवेकस्तु अंआंआइईईउऊऊऋॠऌॡएंऐंओंऔंओंकंचंटंतंपंयंरलवशषसहभणानमंअंःक्षंत्रंज्ञंवित्रिषष्टिवर्णामातृका अनयामातृकयाप्तत्रक्षरंविद्युक्रयाप्राग्वत्सेष्टमंत्रंसंपुटीकृत्यमासमात्रंप्रतिदिनमष्टोत्तरशतंजपेत्संकल्पेपि प्राग्वदेव अपरश्चकुलार्णवे मासमात्रंजपेन्मंत्रंभूतलिप्यापुटीकृतं क्रमोक्रमात्सहस्रंतुमात्सासिद्धोभवेन्मनुरिति शारदायांतु भूतलिप्यापुटीकृत्ययोमंत्रंभजतेनरः क्रमोक्रमाच्छतावृत्यातस्यसिद्धोभवेन्मनुरिति उक्तं अयमर्थः

नत्रक्लोक्लमभ्रलिपिपिण्डिमूलमंत्रस्याष्टोत्तरसहस्रमासमात्रंप्रतिदिनेप्रतिदिनेजपेत्सेकल्पपूर्ववदेव भ्रलिपयस्तु
म्रंधम्रल्लस्रेम्रोम्रोंह्यवरलःकवगघङचछजझञाटठडढनथदमपफभवश्षसरामस्वयसवभक्षमदधथ
ननडढठटणजझछचञगघखकङलवरयहःम्रोम्रोंसेस्लम्रूंउइम्र इतिमूलमंत्रमष्टोत्तरसहस्रमष्टोत्तरशतेनवाप्रतिदि
नेमासमेकंजपेत् म्रष्टोत्तरशतेनगुरुजप्तमंत्रपरंशेषं प्रकारोनरेतुत्रायवीयसंहितारो त्रिकालंनेधपुष्पाद्यैर्योवैयेदे
वतोनिहि पुनश्चरकृत्येनविनैवासौप्रसीदतीति अस्यार्थ म्रघेत्यादिम्रमुककामंत्रसिद्धिकामोरात्रौत्रिकालपूजनेन
रिष्ये इतिसंकल्पंकृत्वावत्समात्रंप्रतिदिनेरात्रौत्रिकालंसर्वोपचारैर्देवंसांगावरणंपूजयेत् सर्वेषामासंत्रिरामासंवामासमा
त्रंवापूजयेत् पुरश्चरणमेतदेवमंत्रसिद्धिर्भवतीति अन्यत्तुकामनेत्रोयामंत्रस्तस्यतत्स्ववर्णौषधिविनिर्मितो तत्र
ह्रीक्लसंख्याभिर्गुटिकामंत्रसिद्धिदा तयाभिषेकस्तत्क्षुरणंतत्स्वाद्यलिप्तेपनं तत्पूजावयथाभिदायकास्तुर्नसंशय
इति अयमर्थः तत्रमंत्रवर्णौषधीनिर्मितमंत्रवर्णसमसंख्यानांगुटिकानांधारणंतत्क्षणमविलेपनंगात्रिपूजातत
क्षाथजलैस्नानेनक्षस्यधारणंवक्रर्यानेतमंत्रसिद्धिर्भवति वर्णौषधयस्तुत्रपेवसारे चंदनकुचंदनागुरुकार्पूरखोशीरखो
गजलकुसुमाः केकोलजातिमांसीमुखोरग्रंथिरोचनापत्रा विष्णुक्रांतिग्रहरुराकनलवेगाकुंकुमंवेदिन्य देयोऽव
रिकाम्मरिकास्थिराज्यदरजाश्विकामयूरशिखा ज्ञाशाक्षाग्निमंथश्रिंहीकृष्णरोंथकृष्णदरपुष्पी रोहिणीकवृत्तीपाय

चित्रानुलस्यपामार्गः शतमखलनादिरेकोविष्णुक्रांतामुशल्ययोंजलिनी दुर्वाश्रीदेवीसहितथैवलक्ष्मीसमभेड आदी
नामितिकथितावर्णानांक्रमवशादिहौषधयः गुलिकायभस्मितप्रभेदतोनिखिलहिंसासिद्धिदायिन्यः अथैतासांनामानिवि
श्चिन्वलिख्यंते मधुकायष्टाश्विपर्णीभद्रराश्चित्रतः चंदनरक्तचंदनभगरुभगरुकर्दरोशिरकुष्ठवालकुंकुमक
कोलजातीफलजतामांस मुखोरग्रंथिगोरोचनापत्रपिप्पलिबिल्वश्चिपर्णीचित्रकतगालवेगकट्फलचंदिपुंडुवरणाभा
राभेदस्थिरापद्मशंखपुष्पीमयूरशिखाकृष्णाभिसिंहीकृष्णधर्मकृष्णशंखपुष्पीरोहिणास्फोताकटहरीपाटलमूर्वापर्णीतु
स्पस्पपामार्गइंद्रवल्लीभृंगराजापराजितानालमूलीकुमोजलिदुर्वाश्रीदेवीभार्गीभद्रमुस्तकपंचाशदौषधयः क्रमादकारा
दिक्षकारांतैकपंचाशद्वर्णानामिनि मंत्रवर्णौषधीग्रहणेयस्मिन्मंत्रेयस्यवर्णास्यात्तावत्यभाग्नतयस्तावतोभागान्ग्राह्याः
अपरःप्रकारश्च मंत्रतंत्रप्रकाशे संस्कृतेऽजितंमंत्रंहत्वाशिष्यायदेशिकः कुर्यादथनयोरेकंशास्त्रदृष्टेनवर्त्मना मंत्रं
निदर्शयित्वातुनामवर्णौयथाक्रमं आद्यंतेसकलेनामतनःप्रणवमालिखेत् पत्रास्त्रेषुसंलेख्याध्येन्नानमंत्रीकृतान्
मूर्जेरोवरागंधाद्यैःपद्ममध्येसुशोभने मृतापात्रेत्रयावेष्यतत्रनःसिच्यकेनतु तिक्षिपेमधुरेतन्नमृन्मयेलघुभाजने क्षी
रपूर्णेनवेकुंभेनक्षिपेल्लघुभाजनं धारयेद्देशिवःकुंभमग्निकुंडसमीप० मंत्रसाधकयोरेकसिध्यर्थंजुहुयान्नतः मूलमं
त्रेणमंत्रशःसहस्रेशतमेववा कुंभेसंपाद्यैवमधुराणात्रयेसुभं लोमेसमायनेकुंभंविनिक्षिप्यजलाशयेस्वगुरुंस्नाल

णांश्चान्येस्तोषयेदक्षिणादिभिः स्वयंचानविजानतिनासौसाधकउच्यते रहस्यंकथितंचैतन्नवदेद्यस्यकस्यचित् उत्तमाय
तुशिष्यायवदेदिदमिति अयमर्थः भूर्जपत्रेगोरोचनादिभिरक्तचंदनलेपमंविरच्यतत्कर्णिकायांसाधकनामार्णाधिरभि
तंमंत्रमाद्यंतेसकलंनामप्रणावंचविलिख्यगुलकीकृत्यपत्रमध्यसंवेष्ट्यतदधिसिक्थेनसंवेष्टसमधुरत्रयपूरितेत्वल्पमात्रेनै
क्षिप्यक्षीरपूर्णेनूतनकुंभेसपत्रगुलिकंतत्पात्रेनिक्षिप्यप्रागुक्तविधिनाग्निकुंडादौसंस्कृत्यतत्संनीपेनतकुंभंसंस्थाप्य पुंभ
येत्यादिभस्मकमंत्रसिद्धिकामोविद्यासाधकयोरैक्यसिध्यर्थंमष्टोत्तरसहस्रंशतंवामधुरत्रयहोममहंकरिष्यइतिसंक
ल्पोपास्यमंत्रेणासंकल्पितसंख्यंघृतंकुंभेसंपातंसुवलग्नेकृतशोधंनिक्षिप्यपनकृत्वातंकुंभंजलाशयेनिक्षिप्यगुरु
ब्राह्मणादीश्चान्नादिभिस्तोषयेदिति येवंकृतेपियदिनसिध्यति तदामंत्रस्यऽवरणादिकंकुर्यात् तदुक्तंमहासारंकृते
त्रै ङावरोवोधनंवश्यंपीडनंपोषणोषणो दहनंचःक्रुधकुर्यान्नतःसिद्धोभवेन्मनुः ङावेरोवारुरोवीजेत्रयंचक्रमयोगत
तमंत्रंयंत्रमालिख्यशिलाकर्पूरकुंकुमैः उशीरोचनाभ्यंचमंत्रंसंग्रथितंलिखेत् क्षीराज्यमधुनोपानंभ्यंतंलिखितक्षि
पेत् पूजनाज्जपनाद्धोमाद्यावितःफलदोभवेत् ङावितोपिनसिद्धोश्चेद्धोधनेनत्संस्कारयेत् सारस्वतेनबीजेनसंपुटीकृ
त्यतंजपेत् स्वयंसिद्धोभवेत्सिद्धोनोचेन्नम्यवसगुरु कवंदनंमहादारुहरिद्रामदनंशिला मदनीकस्तुराशीलामनःशि
ला एतैस्तुलिखितोमंत्रोभूर्जपत्रेसुशोभने कंठेधृतोभवेत्सिद्धोनोचेत्कुर्यात्पुपीडने अधरोत्तररूपेणापदानिपरि

शि.चं
३१

जप्यवै आपीतदेवतांनतद्दधरोत्तररूपिणी विद्यामादित्यदुग्धेनलिखित्वाक्रमबीजेन तथाभूतेनमंत्रेणाहोमकार्यो दिनेदिने पीडितोलज्जयाविद्वःसिद्धश्चेत्तद्विषायेत् बालात्तृतीयबीजेनपुटितंमधुदुग्धतः धारयेद्विनंमंत्रमथवाशोषणंचरेत् धा रणंचवायुबीजाभ्यांलिखेन्मंत्रंविदर्भितं भस्मनाधारयेत्कंठेनोचेद्राहोग्निबीजतः मंत्राणान्वह्निबीजेनवतुर्दिक्षिसमावृ तान् लिखेत्पालाशनैलेनधारयेत्कंठदेशतः सिद्धस्योनात्रसंदेहोमंत्रदृत्याहशंकरः अथैतेषांप्रयोगः तत्रापौष्टा वणंवक्ष्यामितिवरुणबीजगर्भितंमूलमंत्रंकपूरकुंकुमगोरोचनहरितालैःशरीरेःपत्रावक्रमेणलिखित्वाकस्मिन्धित्पात्रे दुग्धघृतमधुजलमेकीकृत्यतत्रमंत्रंनिधायपूजाजपहोमानुकुर्यादि अथवोधनं तत्रवाग्भवबीजपुटितमंत्रजपरू पं अथवशीकरणं तत्रभूर्जपत्रेरक्तचंदनदारुहरिद्राकस्तूरीमनःशिलाभिर्मूलमंत्रमालिख्यकंठेधारयेदिति अथ उच्चाटनं तत्रधरोत्तरभावेनमंत्रपदानिप्रजप्यदेवतामप्यधरोत्तरभावेनध्यात्वार्कदुग्धेनार्कपत्रेमंत्रमालिख्यतत्पादेनाक्रम्याध रोत्तरक्रमपठितमंत्रेणाहोमंचकुर्यादिति अथपोषणं तत्रबालात्तृतीयबीजपुटितमंत्रंगोदुग्धमधुभ्यांभूर्जादौवि लिख्यधारयेदिति अथशोषणं तत्रभस्मयक्तेनोषाबीजविदर्भितंमंत्रमालिख्यकंठेधारयेदिति अथदहनं प लाशबीजतैलेवह्निबीजसंपुटितंमंत्रस्यैकैकमक्षरंविलिख्यप्रतिवर्णमधश्चोर्ध्वंचवह्निबीजमालिकंठेधारयेदिति वि दर्भलक्षणंशारदातिलके मंत्राणांहृदयमध्यस्थंसाध्यनामाक्षरंलिखेत् विदर्भएवविज्ञेयइति स्वकांतरंनुग्रथनमि

राम
३१

नित्य बालत्रयीयवीजंनुवक्ष्यते सुंदराचार्यशिष्येण श्रीनिवासेन धीमता चंडिकायोपशाखोगाचनुर्दशः
इतिश्रीसुंदराचार्यचरणारविंदद्वंद्वनेवासिना श्रीनिवासिभट्टेनविरतायां श्रीशिवार्चनचंडिकायांचतुर्दशपटलः १४
अथसमयाचारः तत्रप्रयोगसारे देवस्थानेगुरुस्थानेश्मशानेवाचतुष्पथोपाटकासनविण्मूत्रमैथुनानिविवर्जयेत् देवे
गुरौगुरुस्थानेक्षेत्रेक्षेत्राधिदेवता सिद्धेसिद्धासौश्रीपूर्वसमरयेत् प्रमत्तामत्तजोकन्यापुष्पीतास्पतितस्त्री बिडूपोमृक
केशीचकामार्त्तीचनिंदयेत् सतादृशीरपिननिंदेदित्यर्थ कन्यायोनीपशुक्रीडांदिग्वस्त्रोप्रकटस्तनीं नालोकयेत्परद
व्यंपरदारांश्चवर्जयेत् धन्यगोगुरुदेवाग्निविद्याकोशवरास्त्रिय विद्याषट्कं नैवप्रसारयेत्पादौनैतानपिनलंघयेत् आल
स्यमदंमोहशाठ्यंमोहविग्रहान् असूयामात्सर्यमानंपरनिंदांचवर्जयेत् आलस्यमनुद्यमं मतांविद्याधनाभिज्ञान्यसंप
त्समृद्धिनोमनसउच्छ्वासः मोहोमिथ्याभिनिवेशः शाठ्यंशक्तिगूहनं पैशून्यंपरोक्षेपरदोषप्रकाशनेअसूयागुरोषुदोषा
रोपः आत्मसन्मानेआत्मनिसम्यक्त्वबुद्धिः लिंगिनेव्रतिनेविप्रवेदवेदांगसंहिता पुराणागमशास्त्राणिकल्पांश्चापिनदू
षयेत् वेदांगानिषडंगानिसंहितामन्त्रादिप्रणितस्मृतिः आगमशास्त्राणिशिवाद्युक्तयामलादीनि आगमेशिवयक्रेभोगनेचत्व
गिरिजामुखे मतंचवासुदेवेनतस्मादागमउच्यते इत्यागमशब्दनिरुक्तिः कल्पानक्षत्रकल्पोविधानकल्पोभिचारक
ल्पःशांतिकल्पश्चेत्यथर्ववेदविभागरूपान्श्राद्धकल्पादिकान्त्सांश्च पंगुशालमस्मानेदामडुंगुलूखलं सूर्पसे

मार्जनीदंडं वज्रंवैडूर्यमायुधं कमलंचामरंछत्रंदर्पणंभूषणंतथा भोगभोग्यानिवस्तूनियागडव्याणियाणिव महास्थानेषुव
स्तूयानिवादेवतालये दिव्योक्तानिपदार्थानिभूतावेष्टानियानिवै लंघयेज्जातुनैतानिनैतानिचपादास्त्रशेत् यागोष्टीके
कविद्विष्टायाचत्वैरविसर्पिणी परिहिंसात्मिकायाचनतावमेनरेत्क्वचित् प्रतिग्रहेनगृह्णीयादात्मभोगविधित्सया देव
तातिथिपूजार्थंयत्नतोप्यर्जयेद्धनं धारयेदार्जवंसत्यंसौशील्यंसमतांधृतिं क्षांतिंदयांमनास्थांचदिव्यांश्रीयंसर्वदा आर्ज
वाचक्रोसत्यंयथादृष्टार्थभाषणं सौशील्यंसुखेभावत्वं समतोरागद्वेषादिराहित्यं धृतिर्दुःखादिभिरवसादिताश्चित्तस्य
स्थिरीकरं क्षांतिंक्षमापरिमावादिवृत्यघमानक्रोधप्रतिवंधंदयांपरदुःखासहत्वं मंत्रेनेत्रघ्रकाशे विभीतकार्कजारंज
सुहिछायांनसंश्रयेत् स्तेनदीयमनुष्याणांमन्येषांश्वाणिनोनथा नखाग्रकेशनिर्भूस्नानकेशघर्षदर्कं स्पृत्पर्सेत्यजेद्रू
रंनखाश्वारजसस्तथा लिंगपुराणो अग्निश्वानरवरोष्ट्राणांमार्जनीभवरेराडकं संस्पृशेद्यदिमूढात्माश्रियेहंतिहरेपि सो
मशेभः नानिंदेत्वारणंदेवंनशास्त्रंतेननिर्मितं नगुरुंसाधकंचैवलिंगस्थानंनलंघयेत् नाघाघ्रेद्यन्निर्माल्यंतदर्थाद्वित्
दिक्षिते नत्रशिवनिर्माल्यं षडंवयमहारत्ने नलंघयेद्गुरोराज्ञामुन्नरंनवदेतथा रात्रौदिवाचतस्पार्शोहासत्वत्परिपालयेत्
न् पादुकायोगपदादीगुरुविज्ञानिसादरं नलंघयेत्पदेनैवपादाभ्यांप्रेरणमेत्सदा सादरंप्रणामेदित्यन्वयः पर्यंकश
यनंतद्धितथापादप्रसारणं अंगभंगवलिलोचकुर्यान्गुरुसन्निधौ गमनागमनेकुर्यात्प्रणम्यगुरुपादके छायानलंघये

तद्वनगच्छेत्ररोगुरोः पश्चात्पादेननिर्गच्छेत्पुरोगमनंचगुरोर्गृहात् गुरोरग्रेगाङ्कर्वीतप्रभावंशिष्यसंग्रहं अहंकारेनकुर्वीतनोत्सर्गोधा
रयेद्वक्त्र प्रगुरोसन्निधौनैवस्वगुरुंपरामेद्बुध नमस्कारायवोपुक्तंगुरुर्दृष्टानिवारयेत् ननियोगंकुरोर्दद्याद्दुष्कर्मानैवभाषयेत्
श्रीनाथदेवस्वामीतीर्थोधनेभाजनेवदेत् जातायामापदिभ्रंशेशपथंकुरुसेज्ञकं नकुर्याद्धिवसंज्ञेवाप्रमादेनक्रियेतवेत् नप
र्थं निर्वहेद्यत्नादंनेपूजाजपादुनिः अनिर्वाहेतुकार्यस्यपदर्थेशपथःकृतः प्रायश्चित्तंजपोदेपिसहस्रंस्वप्नोत्तत्र लो
कोद्वेगकरीयावद्यावच्चर्मनिकृंतिनी स्थित्युद्वेगकरीयाचनांगिरंनैवभाषयेत् रम्यमप्युज्वलमपिमनसोपिसमीक्षिते लो
कविद्वेषणंवेशंनकुर्वीयात्कथंचन अन्योक्तान्यःसदाचारानैहिकामुष्मिकोचितान् आचरेदादराद्योनिदीक्षितःसोधिगच्छ
ति तथानारदपंचरात्रे साधस्यस्वभावेनकेलाश्मश्रुविलुंचिताः संभवेनवस्त्रश्चमस्पूकाविवर्जितः सुक्षीनःसदायश्च
मंत्रमाधरोयेत्परः साधनस्वभावेननेत्यनेनपरश्वरणाम्बुनेवपनंकार्यमित्यर्थः अपनीतकेशश्मश्रुरित्यर्थः अत्रतु
गंगायांभास्करक्षेत्रे पित्रोश्चमरणेविणादृथाछिन्नत्रिशःकेशान्नमाकुर्वीतघातकं प्रयागतीर्थयात्रायांपितृमातृवियोग
नः कृत्वानोपवनंकुर्याद्वृथान्यविकचोभवेत् इतिवकालिकापुराणविछुभ्योयद्वपनंनिषिध्यतेनदक्षिणपरं जटिलामुंदी
नाश्चैवशुक्लयज्ञोपवीतिनः ब्रह्मचर्यरताःशांतावेदतत्त्वज्ञाननत्पराः इतिकर्मपुराणेशैवानांमुंडितत्वोक्तेः तथा सामान्यत्वि
क्षौरस्यार्थेपरेऽनवद्यत्वेन प्रयोक्तव्यमंत्रश्चश्राद्धपिवताचरेत् गारुडेभूतचांदेभयात्त्वार्थेनधामने कृपयाम

रयाकुर्यादनाथेऽअसंसदि सोमसूर्योनसस्येचगवोश्वाश्वग्निमभ्यनभ्यगं भावयेदेवतंविष्णुंगुरूंविप्रशरीरगः अनेनमाता
पितरौविष्णुंनक्षत्रियातिथिं ज्ञेयोविश्वाश्रयीविष्णुराग्नेयश्चविष्णुवत् यत्रयत्रपरीवाऽसन्सर्याछुयनेगुरो तत्रतत्र
नवस्त्रंप्रयायात्सस्मरंहरिं यैःकृतावगुरोर्निंदाब्रह्मोशास्त्रस्यनारदः नाघिनेसहवक्तव्यंवस्त्रंवाकदाचन कर्मसाक्षिनो
वान्यानहिंस्यात्परदारकान् नविंशाद्वत्सराद्देवाविष्णुधर्मेनुनथेवच रुद्राश्चादित्याअग्निश्चलोकपालाग्रहास्तथा गुरुर्वायै
स्त्रश्चापिपुरुषःपूर्वदिक्षित ननेनकृत्रचित्कार्यंशापानुग्रहकर्मणि ननेनमंत्रोवक्तव्योमुद्रावासनयाऽपि स्वानुज्ञानेऽ
पिमत्कर्मसर्वंसर्वंस्वगोपयेत् मंत्रगुप्तिश्चकर्त्तव्यासततंमंत्रसिद्धये तेनसाधकेन तथा यथायथायत्रतत्रगुरुर्वा
याच्चकेवलं अभक्तायगुरोर्नामगुरुर्वायाच्चयतात्मवान् प्रणवश्रीस्तनोनामविष्णुश्चोप्यनेतरं पादशुद्धःसमेनःस
न्नतम्स्वांजलीकृतः तेनऊँश्रीअनंतकविष्णुपादाःश्रीवासुपाशकेसुअनंतकशिवपादाःअमुकशक्तिपादाइत्युच्चर्यं
अथैनंकृतपरश्वरोनिर्मार्चननिरनैरैनैमित्यकार्चनेकाम्यार्चनेचकार्यैः उक्तेवनेत्रराजे नित्यंनैमित्तकंकाम्यंत्रयंपे
क्षतः अन्यथाभजनेदोषकरोत्यापत्परंपरात्मिनि तत्रादौनैमित्तकार्चनं तच्चविशेषदिवशेकार्यंदिशेषदिवशासु
श्रीकृष्ण कृष्णाष्टमीचतुर्दश्यावमावाश्याचपूर्णिमा संक्रांतिपंचपर्वाणितेषुपुराणदिनेषुच पुराणदिनेचिंत्यनेन्यु
त्पादयोभन्यादयोयतीयानपुष्यनक्षत्ररविवारसोमसूर्योपरागाद्यउक्ताः तथाकुलमूलावतारे देवतातिथिनक्षत्रयो

रयोगेशुचेश्वरी सोमसूर्योपरागेशुभन्यादिशुभयुगादिशु देशिकागमनेचैववीरस्वजनदर्शने तथाकुला० गुरुजन्मदिने
प्राप्तेस्वगुरोरपि मानवोयदिपूजांचस्वजन्मदिवसेपिचसंपत्तौचयेलाभेनपोदीक्षाशुभेत्सवे पीठोपपीठगमनेवीरस्व
नदर्शने देशिकागमनेपुण्यतीर्थदैवनदर्शने स्वमादिशुदेवेशिविशेषदिवशेषुच रोगेष्वापत्सुदोषेषुदुःसंगेदुर्निमित्तके य
थाबलेयथाश्रद्धायथाद्रव्येयथाविते यथाकालेयथादेशेयथापूजासमाचरेदिति यामले दमनारोपणंचैवश्रावणेच
विशेषतिति तथानेत्रराजे गुरोस्वजन्मदिवसेविशाखाप्राप्तिदिनेतथा स्वजन्मदिवसेनाथविशाखासरमेवच शुभारत्र
यसंयानदिनेपूर्णादिनेतथा अष्टपर्वासुविशिष्टानिसदर्शसन्नपर्वकर्मणि इत्येवमितिकपूजारात्रौकार्या उक्तंचकु
ला० नित्यार्चनदिवाःकुर्याद्रात्रौनैमित्तिकार्चनं उभयोकाम्यकर्माणिश्रेतिशास्त्रस्यनिश्चयः इति भथैतत्सरोग
तत्रगुरुपरमगुरुपरमेष्ठिगुरूणांजन्मनक्षत्रदिनानिस्वजन्मनक्षत्रदिनेदीक्षाप्तिदिनेगुरोर्मरणादिनेचकृत्स्नचतुर्दशीपूर्णि
मानवास्यारविसंक्रमणापूज्यनक्षत्रविवारयुगादिमन्वादीत्यादिशुपुण्यदिनेषुस्वनित्यपूजानंतरंरात्रौविशेषेणानाना
विधैर्गंधपुष्पादिभिर्महतीपूजांकुर्यात् निष्पन्नपात्रिगुणाजपंचकुर्यादिति भथदमनपूजा तत्रश्रीज्ञानार्ण
वे दमनारोपणंवक्ष्येसाधकानांहितायवै संवत्सरकृतापूजायेनपूर्णाभवेत्क्षिये तपोभंगायमदनोममशैलभवे
यदा भस्मीभवत्तदादुःखीरतिःप्रीतिश्चदुःखिता तत्रेत्रवारिसंभूतादमनस्पल्लताभवेत् तत्सौरभंचसौभाग्यंमहदा

सीत्सुलोचने नेनसंतुष्टहृदयाद्वरोदत्तोमयाप्रिये रत्येप्रित्येचयस्मात्तुदमनःप्रकटीकृतः दमनेनचयोमंत्रीवर्षमेनपू
जयेत् तस्यसोवत्सरीपूजादमनायमहिष्यति इतितस्मैवरोदत्तोमयैवसुखदंतिने तस्मात्दमनपूजाहिकर्त्रव्यादीरवोपेतो
भन्यथातत्फलंवर्षकृतेकामापनश्यति दक्षिणामूर्तिसंहितायां चैत्रादयस्त्रयोमासापक्षौसितसितेवरौ एतेषांपूर्वपू
सुकालसर्वोत्तमोभवेत् अष्टम्यांचचतुर्दश्यांपूर्णिमास्यामथापिवा पूर्वरात्रेप्रकुर्वीतसंयोगाधिवासनं आमंत्रमद
नंवादौचतुःकल्पलनादिभिरिति अथप्रयोग तत्रचैत्रेवैशाखेज्येष्ठेवामासेपक्षद्वयस्याष्टमीचतुर्दशिपूर्णिमाचत्पत
मतिथौपूजादिनात्पूर्वेद्युःसाधकःकृतनित्यक्रियःसायंसामपिकैःसार्द्धंदमनसमीपंगत्वास्वासनेसमुपविश्यपूजाद्रव्या
मंत्रंन्यष्यादिकरन्यासांश्चविधायकामभस्मसमुद्धूतरनिवाप्यजलेऽवगुंठिगंधर्वदेवादिमोहनायनमोस्तुते
संवत्सरिकपूजायापरिपूर्णात्वमिरुये दमनंसमोयाहिक्षमस्वचनमोस्तुते ॐशिवप्रसादसंभूतत्रत्रसंन्निहितोभव
शिवकार्येसमुद्यतेनेनयोस्मिशिवाज्ञया इतिदमनमामंत्रनतत्रकामदेवंरतिंवक्ष्यमाणतत्रमंत्रेणसंपूज्यगृहमाछेद
नंतपूजादिनात्पूर्वदिनकृतनित्यकृत्यःसाधकःसमभिः सार्द्धंपुनर्दमनसमीपंगत्वास्वमंत्रेणदमनंसमूलमुत्पाट्यग
स्त्रेणावाछित्वागृहमानीय ॐभद्योरसैंछंघोरेक्रींघोरघोरतरेश्रीसर्वतःशर्वशर्वेभ्योनमस्तेरुद्ररूपेभ्यःक्रींश्रींइतिने
त्रेणचंदनागुरुकर्पूरकुंकुमादियंकैरालिप्यमध्यमारणस्याग्रादिशादक्षिणेपननवधाविलक्रंदमनं ॐहंनमः ॐसं

राम
३५

म॰ क्षं॰मे॰ले॰वं॰रे॰सं॰उंनमः इतिसंपूजयेत्तथैवानंदेश्वरीबीजेनचनवधाविभक्तेनपूजयेत् आनंदेश्वरीबीजंतरुक्षमलद
रयीइति तत्रादौपूर्वोक्तपूजामंत्रेणश्रीसकारपश्चात्सकारः ॐकारस्थानेईकारोज्ञेयः ततोस्त्रमंत्रेणासंरक्षकरान्मंत्रिमूल
उड्डावधाकवचमंत्रेणादमनोपरिभागपित्वान्ननवस्त्रेणाछाद्यरहस्थापयेदित्यधिवासनेरात्रेकुर्यात् अस्त्रमंत्रःमंत्रक
वचमंत्रादयोमूलमंत्रस्यअंगशोक्तमंत्राज्ञेयाः एवंपूर्वदिनेनिमंत्रणाधिवासनेनकृतेचेत्पूजापूजादिनेवातद्वयंकार्यमिति
ततःपूजादिनेप्रातःसाधिकैःस्नानादिनित्यपूजांनिर्वर्त्यरात्रौसमग्रिभिःसहस्वस्तिवाचकपूर्वकंदमनंपूजास्थानंमानिय
ञ्चविस्यलेप्तिइरेरेखाचतुरस्रवृत्तत्रयवेष्टितमष्टदलकमलंविधायतत्मध्येषट्सुदलेषुचस्वर्णादिरचितान्नवकलशान्
दीक्षोक्तविधिनासंस्थाप्यस्वासपूजादिपीठपूजांतेप्राग्वत्कविधिनाकृत्वास्वदक्षिणभागेसर्वतोभद्रमंडलेप्राग्वदष्टद
लकमलंवासिंदूरादिनाकृत्वातन्मध्येघटवर्णारजोभिरशोकतरुंकृत्वा ॐअशोकायनमस्तुभ्यंकामस्त्रीशोकनाश
क शोकार्त्तिकर्मेनित्यमानन्दंजनयत्वमे इत्यशोकतरुंप्रार्थ्यसंपूज्यतृप्यादिफलयोनोयःकालरूपोमहाबलः
कलयत्यपिविश्वंयत्तस्मैकालात्मनेनम इतिकालंचसंपूज्यतस्याशोकधस्त्रीकोरोमंडूकादिन्यात्वांतंताम्रवतीं
ठपूजांकृत्वाष्टदलकेसरेष्वग्न्यादिप्रादक्षिरोपन सौभाग्यायेनमः हवायै॰वर्धायै॰धनयै॰रत्यै॰प्रीत्यै॰
संगमायै॰निर्वाणायै॰ कामुकायेनमः॥ इतिमध्यांतंसंपूज्यवक्ष्यमाणकामगायत्र्याकामदेवमावाह्यावाहनादि

पाशाप्रतिष्ठानेपाशांकुशधनुर्बाणाभयंपदर्शकामदेवंतरुणंमरुणवर्णंरक्तवस्त्राभरणानात्मानुलेपनंवामदक्षिणाभ्यांदधतं
प्रीतिमनंपाशांकुशपुष्पबाणोक्षुधनुधरंध्यात्वा ॐक्लीं कामदेवायनमः इतिमंत्रेणागंधादिभिःपंचोपचारैःसंपूज्यनक्षत्रा
मभागेरतिंगौरवर्णांरक्तवस्त्रपरिधानांसर्वाभरणाभूषितांपद्मद्वयकरांध्यात्वाश्रीं श्रीं श्रीं क्लीं रत्यैनमः इतिमंत्रेणारतिंगंधादिभिः
संपूज्यकामपक्षिणाभागेप्रीतिंश्यामवर्णांसर्वाभरणाभूषितां रक्तवस्त्रपरिधानांतांबूलकरांध्यात्वाश्रीं क्लीं प्रीत्यैनमः
इतिमंत्रेणापंचोपचारैःसंपूज्यकामदेवस्याग्रेकरेवनमध्येवसंतंगौरवर्णंवामहस्तेनसुधांडंभंदक्षिणहस्तेननानापुष्प
सनुचधंरधानंरक्तवस्त्राभरणामात्मानुलेपनालंकृतंध्यात्वा वसंतायनमस्तुभ्यंवृक्षगुल्मलताद्रिष सहस्रमरुसंगा
रुकामरूपनमोस्तुते वेवसंतायनमः इतिमंत्रेणापंचोपचारैःसंपूज्यकामदेवंतन्मंत्रेणाभ्यर्च्यधूपदीपादीतांबूलां
नुपचारान्समर्प्यकामदेवायविग्महेपुष्पबाणायधीमहीतन्नोनंगःप्रचोदयात् इतिकामगायत्रियथाशक्तिजपित्वाजपस
मर्प्यनमोस्तुपुष्पबाणामजगदानंदकारिणी· मन्मथायजगन्नेत्रेरतिप्रीतिप्रियायच इतिकामदेवंप्रणम्यमूल
मंत्रस्यऋष्यादिन्यासंकृत्वा मध्यकुंभेदेवमावाह्यषाग्वसर्वोपचारैःसांगंसावरणंमदनैःसंपूज्यधूपदीपनैवेद्या
निनिवेद्यनित्यहोमंविधिनाततःकुंडपार्श्वेत्रिगुणासंख्यंकृत्वानित्यजसेरव्यात्रिगुणासंख्यंजपंचकृत्वापूजाशेषंसमा
प्यसर्वरूपजगन्नाथवांछितार्थफलप्रद हत्स्यान्यूनमयेदेवकामात्कामेश्वरेश्वर इतिदेवंप्रार्थ्यविसर्जनगुरुंवि

न्मादिभिः परितोऽप्यङ्कुमारकान्ब्राह्मणांश्चान्मादिभिस्तोषयेदिति दमनपूजाविधिः इदं दमनपूजादमनाराजर्षिवर्णायेवर्णा
र्यतिकेचित् नदुक्तंमंत्रमुक्तावल्यांप्रारंभेदामनीपूजोविशेषत्रैमुभेदिने ततदैवतकेभक्त्यायुरुषादक्षिनःक्रमः पूर्वयुः सं
यतोभूत्वामंत्रीवाधित्रनिश्चने गच्छेदनकारामंपत्राशोकःप्रतीक्षितः तत्रोपविश्यमंत्रज्ञःपूजितेष्वासनेशुभे नत्वागुरुं
गरोज्ञानंस्वेष्टदेवंचमंत्रवित् स्वात्मानंसकलीकृत्यकलत्यापयेदधः वर्धमेचैवसंस्थाप्यविधिनामंत्रविन्नमः आवा
ह्यपूजयेत्पश्चात्कलसेमंत्रदेवतां नदक्षंचैववर्धन्यापूजयेद्धूपदीपकैः दत्वाबलिंभूतकेभ्यस्तानिनिस्सार्यमंत्रवित् मं
त्रेणसपाक्षेपात्रन्मंत्रेणाचमनंततः कुर्यादमनरक्षोचवर्धन्याङ्कभलग्नया कुंभतोयेनाभिषिंचेत्समंत्राद्दमनस्यलिं
ग्रशोकंपूजयेदत्रनदभावेविधायते मंडलेचदनेनाथपत्रपुष्पोपशोभिते कालेनत्रैवसंपूज्यवसंतेचयथाविधि वि
धायनवधापश्चादारामेदमनस्यलीमिति ज्ञानार्णवे दमनेनवधाकुर्यात्पूजयेत्रदनंतरं श्रानेश्वरबीजेननवधा
विद्युनासह नवघ्नकासंभिन्नंदमनंपूजयेक्रमात् इति मंत्रमुक्तावल्यांतुपोक्तविधनैवकामपूजामभिधाय अथो
रविग्रमापश्चादमनंप्रोक्षयवारिणा ग्रस्त्रमंत्रेणासंरक्ष्यकवचेनावगुंथच त्रिरस्त्रमुद्रावध्वाथग्रामयेदमनोपरि
न्यगीतादिभिःसम्यक्कुर्याज्जागरणंनत इति सघोधिवासनेजागरणंनास्ति ततोजागरणंकुर्यात्सोजागरणंन
हि इतिदक्षिणामूर्त्तिसंहितावचनात् अथपवित्रारोपणं तत्रमिथुनसंक्रमाद्यारभ्यतुलासंक्रमणावधिमास

चतुष्टयस्यपक्षयद्वयगनचतुर्थष्टमीनवमीचतुर्दशीपूर्णिमान्यतमतिथौपवित्रेर्देवंसपूजयेत् पवित्राणितु स्वर्णरजतनाम
पट्टसूत्रत्रसरोपप्रसूत्रदर्भमुञ्जशाकल्कलकार्पाससूत्रेष्वन्यतमसूत्रेकुर्यात् कार्पाससूत्रंचेत्तुवस्त्रमीषिःकर्त्तनंत्रिगुणं त्रि
गुणीकृत्यनवसूत्रस्यैकसरत्वेनकल्पितैरुक्तसंख्यैःसूत्रैःपवित्राणिकुर्यात् तत्रास्रोत्तरसूत्रेरुक्तमानि चतुष्पंचाशद्भि
धानानि सप्तविंशतिभिःकनिष्ठानितावत्प्रादेशदीर्घाणिदशग्रंथियुतानिपवित्राणिकुर्यात् इत्थंपूजानरदेवतृप्त
मसंख्यानिपवित्राणिकृत्वास्रोत्तरशतसंग्रंथियुक्तंदिनानुसृजाविस्मरमाणादैर्घ्यमेकंहृत्वापवित्रंकृत्वामनश्चागमज्ञाना
क्रमज्ञानोशिष्योचगंधादिनाभिपर्यंतदैर्घ्यमुक्तपक्षत्रयेत्वेकपक्षानुसारसंग्रंथियुक्तानिपवित्राणिकुर्यात् सत्वे
गोसामान्यपवित्राणि एकग्रंथियुक्तानियथेष्टसंख्यानेनुभिःपरिधानक्षमाणादैर्घ्याणिपवित्राणिकुर्यात् अथग्रंथि
वस्त्रवेष्टनसंख्यानत्रमपवित्रेषुषड्विंशन्मंत्रेषुचतुर्विंशतिकनिष्ठेषुद्वादशहृत्कवचमंत्रेणागथयकार्यः इत्थंपवि
त्राणिविधायविन्यारोपणीदिनान्पूर्वदिनेसाधकःकृतनित्योरात्रौसमग्रिभिः सार्द्धंपवित्राणिपूजास्थानमानीयतत्रसिंह
रादिनाकुंकुमरक्तचंदनकस्तूरीकर्पूरलाक्षागैरिकायैर्गंथिस्थानेषुविचित्रितानिपवित्राणिसंस्थाप्यतेषांमूलेन
ॐकारायनमः नेत्रसंसेवक्रये·बालरोगनाशाय·गुरवे·रवये·सदाशिवायसर्वदेवेभ्योनम·इतिसंपूज्यशिरोमंत्रेणा
भिमंत्र्यहृन्मंत्रेणाभ्युक्षास्त्रमंत्रेणावरुध्यतेषांदशग्रंथिषु क्रियायैनमः ॐघोरुग्रे·वीरायै·गायत्रै·ज्वरापहा

यै०विजयायै०जयायै०मुक्तिपायै०सर्वसिद्धायै०मनोमन्यैनमः इतिपञ्चशक्तीः संपूज्यपवित्रेणमूलमंत्रेणाधूपगंधमंत्रेण
संपूज्यसुगंधपुष्पाणिपंचरत्नानिसर्वौषधीश्चनिक्षिप्यनववस्त्रेणाच्छादयेत् इत्याधिवासने पंचरत्नानितुसूर्यादित्यपरा
गो वज्रंमुक्ताफलंनीलंपद्मरागंतथैवच मरकतेनसमायुक्तंपंचरत्नमिदंविदुः वज्रंहीरकं मरकतंपाउडनिसुसिद्धं
सर्वौषधयस्तु सिद्धार्थकुष्ठरजनीद्वयलोध्रसल्लाक्षशैलफलिनीद्वयमांसयुक्ताः इतिस्थूलयुक्ताः सिद्धार्थस
र्षपा रजनीद्वयंहरिद्रापरुहरिद्राच मञ्जलकेउशीरभेदउर्द्धवितानान्तरजास्थानेवितानादिभिरलंकृतेप्रविश्य
पूजाविष्टराद्यूर्द्धवितानान्तरजाविष्टरपर्यंतेनेष्टहस्तविन्यासेनासनपूजादिन्यासजातंविधायदमकन्यूजा
वर्द्धभस्थापनाद्यात्मपूजापीठपूजांतेपोक्तविधिनाविधायतस्मिन्कुंभेदेवमावाह्यसावरणंरत्नपूजादेवाय्यमूलमंत्रेणाप
वित्रेसमर्प्यगायत्रिदेवतांचपवित्राणिसमर्प्यधूपनैवेद्यनैमित्तिकहोमान्कृत्वागुरुसंतोषणस्तस्मैपवित्रेमन्त्रपूरणी
कृतिंकृत्वाग्नयेपवित्रेसमर्प्यगुर्वनुज्ञयास्वयमपिपवित्रधारणंकृत्वासामपिकान्नपानपिष्टालवणादीन्यविघ्नमाप
नदक्षिणादिभिःपरितोष्यपूजाशेषसमाप्यब्राह्मणान्भोजनभूरिदक्षिणादिभिःसंतोषयेत्इतिपवित्रारोपणादि
धिः इत्थंपवित्रारोपणपूजाभत्यावश्यकीमकरणेनिंदाश्रवणान् तथाकुलमूलावतारे पवित्रकेणानेनपूर्व
माराधितःशिवः प्रसादाभिमुखोभूत्वातस्मैवरमदक्षिणः प्रतिवर्षंनकुर्वंतिपवित्रारोपणानिये तेषांसावत्सरीपू

शि॰च
३९

जानवक्ष्मभविष्यति ननःप्रभृतिकुर्वंतिशिवभक्ताःपवित्रकं आराधकेश्वकर्त्तव्यंकामाचार्य्यायोगिनः कुर्यान्निजगुरुसंक्रांते
सुलासेक्रमणावधि पक्षद्वयेपिपूजास्याच्चतुर्थ्यामष्टमीदिने नवम्यांचचतुर्दश्यांपवित्रारोपणंदरेत् सोवर्णंराजतंता
म्रैकृतादिषुयथाक्रमं कलौकार्पासजेवापियथाशक्तिपवित्रकं कर्त्तितद्विजकन्याभिस्त्रिगुणत्रिगुणीकृतं धौतेषु
क्लेशभंसत्रमन्यदप्युपयुज्यते पट्टवल्कलपक्षोर्ण्यक्षौमदार्भसणोद्भवं मेज्ञादिसंभवंसूत्रंपवित्राजडशनते इ
ति श्रावणादिषु दक्षिणामूर्त्ति जाषाढउत्तमोमासःश्रावणोमध्यमोभवेत् हीनोभाद्रपदोमासःपक्षोसितसितेतरो
प्रशस्तःशुक्लपक्षस्तुनदलाभेसितेतरइति इतिनैमित्तिकपूजा अथकाम्यपूजा तत्रश्रीकुलमूलावतारे शृणु
देविप्रवक्ष्यामिकाम्यकर्माणिसुंदरि यानिज्ञात्वाखिलादेविमंत्रीकामानसमश्नुते षड्विधानीहतानिस्युःक्रूराणिदेवियथा राम
क्रम शांतिर्वश्यंस्तंभनंचविद्वेषोच्चाटमारणे शांतिर्नाममनुष्याणांरोगकृत्यादिनाशनं वश्यंस्त्रीराजलोकानांस्वपत्नी ३९
करणंमतं क्षोभोद्योगतीनांतुनिरोधस्तंभनंमतं राज्ञारीनांगजव्याघ्रसर्पादीनांमपीश्वरीति कुलयामले अग्निप्राण
जथासैन्यवीर्यंविषंमहौषधं विषदंष्ट्रादिसर्वंशांस्तंभनेकर्मकारयेत् तथा भन्योन्यंचैरजननेस्निग्धानाद्वेष
णंमतं उच्चाटनंतुद्विषतांदेशादिभ्यःप्रवासनं मारणंप्राणहरणंशत्रूणामीरितंप्रिये मारणंवर्जयेद्विप्रान्मंत्रा
पिसुधार्मिकान् स्त्रीजनव्यतिरिक्तेषुराजवैरिषुयोजयेत् स्वरक्षणेवालोकानांरक्षार्थंवानदाचरेत् नतुलोभाद्व

वापिकुर्यान्मंत्रीनुमाररा प्रायश्चित्तंनुकर्त्रंयंदेवितशेषशांतये अयुतंप्रजपेन्मंत्रंनुरुपयान्नावदीश्वरी सहस्रैपायसैर्देवि
तिलैर्वावीरवंदिते आत्मरक्षाचकर्त्राकर्मकालेसदाशुचेः शोधयिभ्याहोरात्रंवसंतादिऋतुक्रमात् हेमंतेशांतिकंकु
र्याद्दसंतेवश्यकर्मच शिशिरेस्तंभनंप्रोक्तंग्रीष्मेविद्वेषणंप्रिये प्रावृड्युच्चाटनेशस्ताशरणामारणाकर्मणि शुभादर्शनो
पिवसंतकालस्यग्राह्यः नयोरेवफलकत्वेनाभेदात् शांतिकर्मणिदेवेशिपूजयेद्वारिमंडले वरुणयमंडलेवह्नेःसंया
वनिमंडले विद्वेषणेप्योमगेहेयजेउच्चाटनेप्रिये वायुगेहेवरारोहेवह्निगेहेनुमाररा तत्रस्थोध्येत्कालेतत्रत्यंडं
लमुद्धरेत् तत्रस्थे मूलाधारोद्भवोवायुःप्राणाग्न्यात्मसंश्रये सनुपंचविधोभूतःभेदाद्भेदवदेशतः नासायाःपु
रतोःपार्श्वेनुगमध्याधरंप्रगाः प्राणानिलंवुरत्वात्मानःपवनास्पुर्यथाक्रममिति अस्यार्थः नासारंध्रेणानिर्गच्छन्वायु
र्यदानिर्यक्चलतिनदावायुभूतोदयकालः यदोर्ध्वंवलतिनदाग्नेरुदयः यदात्वधश्चलतिनदाजलोदयः यदामध्या
नलदाकाशभूतोदयःकालःइतिः अलप्रकाशतंत्रे मंडलानिमहेशानिभूतानोश्रृणुवल्लभे आकाशमंडलंधूम्रंवर्तुलं
परिकीर्तितं षट्कोणमंडलंवायोःकृष्णषट्कोणलोहिते सस्वस्तिकंत्रिकोणंतुरक्तंवह्निमंडलं अर्द्धचंद्रनिभंस्वच्छं
पद्मयविराजिते आप्यमंडलमाख्यातंचतुरस्रंमहेश्वरि अस्रवज्रयुतंपीतंधरामंडलमीश्वरी तत्रबीजसमायुक्तंमंडलंपू
जयेत्क्रमात् तत्तद्वर्णाननिर्मायडव्येशापरमेश्वरी शारदातिलके तत्रभूतसमानानिमंडलानिविदुर्बुधः वर्णास्वैरावा

न्याऽऽस्वस्वनामावृतान्यपि इति मूलस्वनावृतानीत्यस्मन्दीकाकृतारावधृतेनैवास्यानेकृतेवस्यमाणंभूतलिपिमंत्रेणुतनमंत्र
लिखितमंत्रेणावृत्तानिनिसांप्रदायिकावदंति वृहद्यामले मुखकर्मप्रवक्ष्यामिसर्वदिक्षुयथाक्रमं दिक्पूर्वाभिमुखोभूत्वाव
रुणार्घंकारयेत्सुधिः दक्षिणासामुखोभूत्वासर्वाभिचारकर्मसु धनसिद्धिमवाप्नोतिपश्चिमाभिमुखस्थितः उत्तराभिमुखःकुर्या
त्सर्वशांतिकरंपरं आग्नेयाभिमुखोभूत्वासर्वाभिचारकर्मसु नैऋतीदिशिमाश्रित्यविद्वेषंकारयेत्प्रिय वायर्वीदिसिमाश्रित्यो
च्चाटनंभवेत् ईशानीसमुपाश्रित्यसर्वज्ञानप्रसाधयेत् अत्रयद्यपिस्तंभनेदिगनुक्ता तथापिदिगनुक्तौतुपूर्वास्यात्सर्वकर्म
सुसर्वदाइतियोगिनीतंत्रवचनात् पूर्वाभिमुखस्तंभनंकर्मकुर्यादिति सारसंग्रहे रातिवारीरमाज्येष्ठादुर्गाकालीतिषड्वृद्ध
नात् षट्कर्मदेवताःप्रोक्ताःकर्मादौनाःप्रपूजयेत् ज्येष्ठाधूमावती काली भद्रकाली तत्रतत्कर्मादौतत्तद्धिदेवतांपूजयेदित्य
र्थतथा पद्मपाशगदाख्यांशूलशक्तिखड्गका मुद्राःषट्कर्मसुप्रोक्तास्तत्तत्कर्मणियोजये पद्मंचस्वस्तिकंचैवत्रिकोण
कंसंज्ञके वज्रंभद्रासनंचेतिवासराणिविदुःक्रमात् त्रैलोक्यदामरतंत्रे नमोनःशांतिकेषुष्टौद्वितियांतेदक्षिणेन वह्निकर्मी
णाहोमेषुस्वाहांतःसिद्धिदायकः वौषट्पद्मवसंमुक्तोमंत्रपुष्पादिसाधनेकुंकारश्चवषट्वोपेतोमारणोच्चाटनादिना मंत्रभेज
नकार्येषुसुघोरभयनाशने वषट्तोमहाकालग्रहमालाविनाशकः खडंनोच्चाटनेवेधेमंत्रःफट्पद्मवान्वित ॐकार
प्रवरौमंत्रौवेदागमसमुद्भवौपद्मवोस्यागमेमंत्रेवैदिकेनास्तिपद्मवत् पद्मवेनविनाजपोमंत्रोवेदसमुद्भव ननग्नकीर्त्ति

राम
४०

नेयस्यादैश्वर्यपरिधानवान् नमोन्तइत्यासुक्रमेनन्यस्तवर्णकान्यजपेन्नत्रकामनाभेदेमूलमंत्रोनेयोज्ञे ननमुक्ति पद्मवेन.
विनामशोनमुसेपरिकीर्त्तितः इतिस्वयमुक्तोदोष वेदमंत्रसुसदादोषरहितइत्यर्थः वृहद्यामले गजचर्मस्तंभनेचमारणो
हिषेनथा मृगचर्मनथोच्चाटेछागलेवश्यकर्मणि विद्वेषेजीवुकंचर्मगोचर्मणिमोहने चित्रकंमोक्षदंचैवसुखार्थेरुरुच
र्मणि अभिचारणिसर्वाणिमेषीचर्मणिकारयेत् सर्वविज्ञानकार्येषुश्वेतकंवलमासनं नानाविधेषुकार्येषुबाघ्रचर्मसमी
रितं खड्गचर्मासनंकार्यंपित्मोक्षकरंपरं शांतौकुशासनंभद्रेसर्वसिद्धिकरंपरं मोहनेराजतंचैवस्तंभनेताम्रमासनं मा
रणोच्चाटनेचैवविद्वेषेचाभिचारके सर्वकर्मणाकार्येषुचासनेचायसंविदुः नीलासने ऋणुदेविप्रवक्षामिकाम्यकर्माणि
देवता आदौसमर्चयेविघ्नंसर्वविघ्ननिवृत्तये तर्पोर्चयित्वावाशेसौनिथीशानक्षदेवता कर्माधिदेवतांपश्चात्पूजयेद्विधि व
त्पिये ततोर्चयेदिष्टदेवंतत्कर्मोक्त विग्रहं तत्कर्मोक्तविधिनातन्नमेउत्तमध्यगं तत्कर्मादितेकुंडेजुहुयाद्विधिवत्प्रिये त
त्कर्मादितैस्ततत्कर्मोक्तमुद्रया मुद्रातुवृत्तयामले होमेमुद्रात्रयंप्रोक्तंमृगीहंसीचसूकरी सूकरीकरसंकोचीमृगीमु
क्तकनिष्टिका हंसीस्यात्तर्जनीमुक्ताद्विधामुद्राप्रकीर्त्तिता शांतिकेपौष्टिकेचैवमारणोच्चाटनेतथा विद्वेषेस्तंभनेचैववश्ये
चपरमेश्वरी शांतिकेचमृगीज्ञेयाहंसीपौष्टिककर्मणि अभिचारेसौकरीस्यान्मारणोच्चाटनादिषु पंचमीश्वरीतंत्रे
तर्पणानांक्रमंवक्ष्येमंत्राणांपंचमेकके हरिद्रामिलितंतोयंमोहनेभवतिध्रुवं उच्चाटकंसमरिचंमारणेविहितंभवेत्

उच्चाटनेमेषरक्रमिश्रितंजलमाहरेत् जानुमवनीगत्वाक्रियासुस्तंभनस्यवै वामपार्श्वेनिषण्णःसन्पंचधानर्पयेन्मंत्रं पिंगलायते ऋ
राद्देविप्रवक्ष्यामिवारंतिथ्यादिदेवता रवौसूर्यशिवौदेविचंद्रेसोमाविकेनताः भौमेनुमंगलगुहौबुधविष्णूनतःपरे परेगुरुश्चतुर्वक्रो
भृगोशुक्रपरंदरौ नंदेशनैश्चरःकालोवारेसादेविकीर्त्तिता परेबुधवारेपरेगुरुवारेनथा ब्रह्माविधाताविष्णुश्चयमःक्षीनकरोगु
रु इंद्रश्चवसवोनागाधर्मःशिवदिवाकरौः मन्मथश्चकविश्चैवविश्वेदेवास्तिथीश्वराः दर्शेतुपितरोदेविपूज्यामर्चोपचारकैः
आश्विनोचयमोवह्निब्रह्मेदुश्चशिवोदिति गुरुरुद्रूजपितरोभगोर्यमदिनेश्वरा त्वष्टावायुरथेंद्राग्नीमित्रश्चेंद्रस्ततःप्रिये निऋ
तिश्चैवनोयंचविश्वेदेवाःप्रजापतिः विष्णुश्चवसवोदेविवरुणश्चाजएकपात् अहिर्बुध्न्यश्चपूषाचप्रोक्तानक्षत्रदेवताः एतासर्वो
